श्री हयग्रीवाय नमः

स्तोत्रमञ्जरी

भावि समीर श्री वादिराजतीर्थ विरचित स्तोत्राणि

Stotramañjarī

A collection of *stotra*-s by Vādirāja Tīrtha

http://www.dvaita.org

kernel version 1.21, 02/07/2001

© 2000, Shrisha Rao

This edition, along with all its prefatory material and indices, is copyrighted under Title XVII, United States Code, and similar laws in other countries. Permission is hereby given to make single copies for individual, non-profit uses in “private study, scholarship, and research” as allowed under the law, provided that such reproduction be done of this entire publication, especially including this notice. All other uses, as well as storage or archival of this material in any publicly accessible medium, are expressly forbidden unless prior written consent is obtained.

Introduction

Human birth is a unique and priceless medium for realizing one's goal of existence. Having attained such a birth one is well-advised to embark upon the path of spiritual upliftment. The goal is undoubtedly daunting and seemingly unattainable; however, if it were indeed unattainable, the Lord would not have instructed Arjuna to base his every action upon the instructions in the *śāstra* (BG 16.24). Having accepted such moderated conduct, which results in spiritual upliftment, as the goal of one's existence, a person then faces the issue of how to proceed. It is verily a bewildering task for even the intelligent to decide what has to be done and what not (BG 4.16). The easiest recourse for a seeker is to follow in the footsteps of those who have set a precedent by living a life in accordance with the *śāstra*-s.

Śrī Vādirāja Tīrtha (1480-1600), a prominent personage in the Mādhva *sampradāya*, composed important polemical works such as the Yuktimallikā, etc., and also contributed greatly to the commentarial literature of his tradition with works such as the Bhāva-Prakāśikā, the Gurvarthadīpikā, etc. He was also an ardent devotee and a very gifted poet who composed works such as the Rukmiṇīśa-Vijaya which give ample evidence of his gifts as a poet and as a devotee. He also has given us many *stotra*-s glorifying Viṣnu (in His many forms), and also Ācārya Madhva. In these, he has lucidly delineated the prescription for living a life according to the *śāstra*-s. More about this author and about his works may be learned from the **History of the Dvaita School of Vedanta and Its Literature** by B.N.K. Sharma (Motilal Banarsidass, 1981), and other sources.

The Daśāvatārastuti is perhaps the most widely known *stotra* and worships Viṣnu in His ten *avatāra*-s. The Trivikramastotra extols Lord Trivikrama in Sode, the abode of Śrī Vādirāja Tīrtha. In the Hitopadeśa he sums up the important teachings of the *śāstra*-s and counsels the seeker to be rid of vices and to practice *dharma*.[1] In the Kurustuti he teaches humility towards elders and teachers in acceptance of the Omnipotence of the Lord and the fulfillment of the prescribed duties. His stotras such as the Chintākhaṇḍanastotra are intended to alleviate worldly worries and suffering. The Haryaṣṭakam vividly describes the precarious position of an individual in the world by comparing him/her to an animal which has fallen into a well and is unable to rescue itself. In the Śrīśrīśaguṇadarpaṇa-stotra he worships the Lord of Lakṣmī, and at the end, as in other instances, boldly declares that one who chants it

[1] There is a tradition that the Hitopadeśa is by Śrī Akṣobhya Tīrtha; however it is included here because there is no credible evidence for this claim and there is also the tradition which attributes the same to Śrī Vādirāja.

with devotion will undoubtedly attain great wealth. Only a few of the *stotra*-s are mentioned here for the sake of brevity — interested readers are encouraged to study these and also the rest in detail.

I would like to thank Meera Tadipatri and Keshava Tadipatri for their help in proofing this work. I thank all others who were in any way related to this publication.

Please report any errors found.

Anand Ravipati

March 23, 2000
Vādirāja Ārādhanā

स्तोत्रसूची

अक्षपञ्चकम्..... १

अधिकरणनामावळिः..... २

अभयसंस्तवः..... १८

अष्टमहिषीयुक्तकृष्णस्तोत्रम्..... २०

अवतारत्रयस्तोत्रम्..... २२

आपादस्तोत्रम्..... २३

उक्तिप्रत्युक्तिस्तोत्रम्..... २५

ऋणमोचनस्तोत्रम्..... २६

एकादशीनिर्णयः..... २८

कुरुस्तुतिः (लकारविभक्त्येकतास्तुतिः)..... ३३

श्रीकृष्णरामावतारचरितरत्नसंग्रहः..... ३५

श्रीकृष्णस्तुतिः..... ३८

श्रीकृष्णस्तुतिः..... ४०

श्रीकृष्णस्तोत्रम्..... ४३

चक्रस्तुतिः..... ४५

चतुर्विंशतिमूर्तिभेदस्तोत्रम्..... ५२
चिन्ताखण्डनस्तोत्रम्..... ५४
श्रीत्रिविक्रमस्तोत्रम्..... ५६
दशावतारस्तोत्रम्..... ५८
दशावतारस्तुतिः..... ६०
दुर्गास्तवः..... ६५
धीशुद्धिस्तोत्रम्..... ६७
नरहर्यष्टकम्..... ६९
नवग्रहस्तोत्रम्..... ७१
नैवेद्यप्रकारः..... ७२
परमस्तुतिः..... ७३
पाषण्डखण्डनं व्यासस्तोत्रम्..... ७५
प्रार्थनादशकस्तोत्रम्..... ७८
भूगोळवर्णनम्..... ८०
मध्वमुनिप्रतापाष्टकम्..... ११०
मुख्यप्राणाष्टकम्..... ११२
रमेशस्तुति..... ११४

रामदशकम्..... ११५
रामकवचम्..... ११७
रौप्यपीठकृष्णस्तुतिः..... १२०
लक्ष्म्यार्यावृत्तम्..... १२२
वराहपञ्चकम्..... १२४
वराहहयवदनस्तोत्रम्..... १२५
विभीषणहनुमत्संवादरूपवायुस्तुतिः..... १२७
विष्णुस्तुतिः..... १३०
श्रीमद्वेङ्कटेशमङ्गलाष्टकम्..... १३२
व्यासवर्णनम्..... १३४
व्यासस्तुतिः (व्यासाष्टकम्)..... १३५
श्रीश्रीशगुणदर्पणस्तोत्रम्..... १३७
सङ्कल्पपद्धतिः..... १३९
सदाचारस्मृतिः..... १४०
सप्तरात्रोत्सवप्रकारः..... १४२
सहस्रारस्तुतिः..... १४५
स्वाप्नपद्यम्..... १४७

हयग्रीवस्तोत्रम्..... १४८
श्रीहयग्रीवदण्डकम्..... १५०
हयग्रीवध्यानप्रकरणम्..... १५३
हयग्रीवपञ्चकम्..... १५७
हयग्रीवस्तुतिः..... १५९
हयग्रीवसम्पदास्तोत्रम्..... १६१
हयवदनाष्टकम्..... १६२
हयास्यदशकम्..... १६४
हरिभक्ताष्टकम्..... १६६
हर्यष्टकम्..... १६८
हितोपदेशः..... १७०

अक्षपञ्चकम्

गिरान्तेऽर्थानुसन्धातृंश्चिरान्तेवासिनो हरे ।
पुरान्ते दर्शनोत्कान्नः स्मरान्ते स्वीयमुन्नयन् ॥ १॥

पोषायाऽऽषाढाब्दनादवेषशेषादिकेकिनाम् ।
द्वेषान्तासुरपाषाणपेषायाशनिरोषधूः ॥ २॥

भाषाशेषाङ्गभूषाणां घोषाभा शोषदा द्विषाम् ।
हेषा तवैषा निर्दोषा तोषाय स्याद्धयास्य मे ॥ ३॥

हृद्यविद्याब्धिशब्दाभा मार्गे कलकलप्रभ ।
स्वर्गिणामुपदेशे सा वल्गुवाद्यस्वनायते ॥ ४॥

सेनाया वैरिसेनाया नाकिनां सपिनाकिनाम् ।
भयाभयप्रद स्यान्नोऽभयायांहोभयाय सा ॥ ५॥

भीरुणा वैरिणः पापाद्दारुणादक्षपञ्चकात् ।
यतिना वादिराजेन कृतिनेयं कृतिः कृता ॥ ६॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

अक्षपन्चकं सम्पूर्णम्

अधिकरणनामावळिः

१ ॐ विशिष्टाधिकारिकमोक्षफलकजिज्ञासागोचराय नमः ॐ

२ ॐ जगज्जन्माद्यष्टकर्त्रे नमः ॐ

३ वेदादिसकलशास्त्रजनितनिखिलजगज्जन्मादि कारणत्वप्रमागोचराय नमः ॐ

४ उपक्रमादिलिङ्गकनिखिलशास्त्रतात्पर्यगोचराय नमः ॐ

५ ॐ सर्वशब्दमुख्यवाच्याय नमः ॐ

६ ॐ अन्यत्रप्रसिद्धनामात्मकाशेषशब्दसमन्वयप्रतिपादकपादप्रतिपाद्याय नमः ॐ

७ ॐ आनन्दमयादिगुणिसामान्यवाच्यानन्दादिगुणवाचिशब्दसमन्वयगोचराय नमः ॐ

८ ॐ सर्वान्तस्थेन्द्राद्यशेषाधिदैवगतशब्दवाच्याय नमः ॐ

९ ॐ आकाशाद्याधिभौतिकसर्वशब्दवाच्याय नमः ॐ

१० ॐ प्राणाद्यशेषाध्यात्मिकसर्वशब्दवाच्याय नमः ॐ

११ ॐ कर्णाद्यगोचरज्योतिषे नमः ॐ

१२ ॐ गायत्रीशब्दवाच्याय नमः ॐ

१३ ॐ त्रिविधोपासागोचरप्राणशब्दवाच्याय नमः ॐ

इति प्रथमाध्यायस्य प्रथमः पादः

१ ॐ सर्वगताय नमः ॐ

२ ॐ चराचरात्त्रे नमः ॐ

३ ॐ गुहांप्रविष्टत्वप्रयुक्तसुकृतफलभोक्त्रे नमः ॐ

४ ॐ अक्ष्यादित्याद्यन्तस्थाय दिव्यदृष्टिगोचराय नमः ॐ

५ ॐ सर्वान्तर्यामिणे नमः ॐ

६ ॐ अदृश्यत्वादिगुणकाय नमः ॐ

७ ॐ पाचकत्वादिमद्वैश्वानराय नमः ॐ

ॐ अन्यत्रप्रसिद्धलिङ्गात्मकाशेषशब्दवाच्याय नमः ॐ

इति प्रथमाध्यायस्य द्वितीयः पादः

१ ॐ द्युभ्वाद्यायतनाय नमः ॐ

२ ॐ भूम्ने नमः ॐ

३ ॐ अक्षराय नमः ॐ

४ ॐ सते नमः ॐ

५ ॐ हृत्पद्मस्थाय नमः ॐ

६ ॐ आनुकूल्येन गृह्यमाणाय नमः ॐ

७ ॐ ईशानाय नमः ॐ

८ ॐ ब्रह्मविद्याधिकारिदेवोपास्याय नमः ॐ

९ ॐ शूद्रादैर्वेदविद्याऽविज्ञेयाय नमः ॐ

१० ॐ वज्राय नमः ॐ

११ ॐ ज्योतिषे नमः ॐ

१२ ॐ आकाशाय नमः ॐ

१३ ॐ स्वप्नादिद्रष्ट्रे असङ्गाय नमः ॐ

१४ ॐ नित्यमहिम्ने ब्राह्मणाय नमः ॐ

ॐ उभयत्रप्रसिद्धनामलिङ्गात्मकाशेषशब्दवाच्याय नमः ॐ

इति प्रथमाध्यायस्य तृतीयः पादः

१ ॐ अव्यक्ताय नमः ॐ

२ ॐ कर्मतदङ्गवाचिज्योतिष्टोमवसन्तादिशब्दवाच्याय नमः ॐ

३ ॐ बहुत्वसंख्याविशिष्टवाचिपञ्चजनादिशब्दवाच्याय नमः ॐ

४ ॐ अवान्तरकारणवाच्याकाशादिशब्दवाच्याय नमः ॐ

५ ॐ सकललौकिकवैदिकशब्दपरममुख्यार्थाय नमः ॐ

६ ॐ प्रकृत्याद्यशेषस्त्रीलिङ्गशब्दवाच्याय नमः ॐ

७ ॐ निषेधमुखवेद्यशब्दवाच्यसदादिशब्दवाच्यायाशेषस्वर-
वर्णपदवाक्यात्मकाशेषशास्त्रयोनये जगज्जन्मादिकर्तृत्वमुखानन्तगुणाय नमः ॐ

ॐ अन्यत्रैव प्रसिद्धाशेषशब्दवाच्याय नमः ॐ

इति प्रथमाध्यायः समाप्तः

ॐ सकलविरोधशून्यसमन्वयगोचराय नमः ॐ

१ ॐ अप्रमाणावैदिकस्मृत्यविरुद्धकारणत्ववते नमः ॐ

२ ॐ फलविसंवाद्यनित्यविलक्षणवेदगोचराय नमः ॐ

३ ॐ जडत्वयुक्तयविरुद्धमृदाद्यभिमानिवकृत्वपरवेदगोचराय नमः ॐ

४ ॐ विश्वप्रागभावकर्तृत्वसाधकयुक्तयविरुद्धकर्तृत्ववते नमः ॐ

५ ॐ जीवाभिन्नत्वयुक्तयविरुद्धसर्वकर्तृत्ववते नमः ॐ

६ ॐ स्वतन्त्रसाधनान्तरसापेक्षत्वयुक्तयविरुद्धस्वतन्त्रकर्तृत्ववते नमः ॐ

७ ॐ जीवकर्तृत्वयुक्तयविरुद्धकारणत्ववते नमः ॐ

८ ॐ सर्वशक्तिप्रसक्तयादियुक्तयविरुद्धकर्तृत्ववते नमः ॐ

९ ॐ निष्पलत्वादियुक्तयविरुद्धकर्तृत्ववते नमः ॐ

१० ॐ वैषम्यादिदोषप्राप्तिरूपयुक्तयविरुद्धसर्वकर्तृत्ववते नमः ॐ

११ ॐ चेतनत्वयुक्तयविरुद्धसर्वगुणपूर्णत्ववते नमः ॐ

ॐ सर्वयुक्तयविरुद्धगुणपूर्णत्ववते नमः ॐ

इति द्वितीयाध्यायस्य प्रथमः पादः

१ ॐ निरीश्वरसांख्यसमयाविरुद्धकारणत्ववते नमः ॐ

२ ॐ सेश्वरसांख्यसमयाविरुद्धस्वतःकर्तृत्ववते नमः ॐ

३ ॐ चार्वाकसमयाविरुद्धजगत्कारणत्ववते नमः ॐ

४ ॐ पुरुषोपसर्जनप्रकृतिकर्तृत्वसमयाविरुद्धकारणत्ववते नमः ॐ

५ ॐ प्रकृत्युपसर्जनपुरुषकर्तृत्वसमयाविरुद्धजगत्कर्तृत्ववते नमः ॐ

६ ॐ वैशाषिकादिसमयाविरुद्धसर्वगुणपूर्णत्ववते नमः ॐ

७ ॐ वैभाषिकसौत्रान्तिकसमयाविरुद्धजगत्कर्तृत्ववते नमः ॐ

८ ॐ शून्यसमयाविरुद्धजगत्कारणत्ववते नमः ॐ

९ ॐ विज्ञानवादिसमयाविरुद्धजगत्कारणत्ववते नमः ॐ

१० ॐ जैनसमयाविरुद्धजगत्कारणत्ववते नमः ॐ

११ ॐ पाशुपतमताविरुद्धजगत्कारणत्ववते नमः ॐ

१२ ॐ शक्तिमताविरुद्धजगत्कारणत्ववते नमः ॐ

ॐ सर्वकुसमयाविरुद्धजगत्कर्तृत्ववते नमः ॐ

इति द्वितीयाध्यायस्य द्वितीयः पादः

१ ॐ आकाशोत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

२ ॐ मुख्यवायूत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

३ ॐ स्वोत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

४ ॐ तेजोजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

५ ॐ अब्जन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

६ ॐ द्वारविषयश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

७ ॐ स्वाकर्तृकजगत्संहारश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

८ ॐ अधिभूतादिसंहारकश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

९ ॐ अधिभूतादिलयक्रमश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१० ॐ स्वलयश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

११ ॐ जीवजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१२ ॐ जीवपरिमाणुश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१३ ॐ जीवसांशत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१४ ॐ जीवैक्यश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१५ ॐ जीवनित्यत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१६ ॐ जीवस्वरूपश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१७ ॐ जीवकर्तृत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१८ ॐ जीवेशांशत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१९ ॐ जीवप्रतिबिम्बत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

ॐ इति श्रुतिपरस्पराविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

इति द्वितीयाध्यायस्य तृतीयः पादः

१ ॐ इन्द्रियोत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

२ ॐ मनोजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

३ ॐ वागुत्पत्तिश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

४ ॐ प्राणसंख्याश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

५ ॐ प्राणपरिमाणश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

६ ॐ मुख्यप्राणजन्मश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

७ ॐ मुख्यप्राणपारतन्त्र्यश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

८ ॐ दासप्राणश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

९ ॐ प्राणाणुत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१० ॐ जीवकरणत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

११ ॐ मुख्यप्राणस्येन्द्रियत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१२ ॐ प्रपञ्चस्रष्टृत्वश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

१३ ॐ शरीरकारणविषयश्रुत्यविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

ॐ इति न्यायोपेतश्रुतिपरस्पराविरोधप्रयोज्यसमन्वयगोचराय नमः ॐ

इति द्वितीयाध्यायः समाप्तः

ॐ वैराग्यादिप्रसादान्तसाधनप्राप्याय नमः ॐ

ॐ भक्तिदार्ढ्यप्रयोजकवैराग्यगम्याय नमः ॐ

१ ॐ भूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ

२ ॐ समस्तभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ

३ ॐ प्राणगत्यविनाभूतभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ

४ ॐ विशेषप्रमाणोक्तभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ

५ ॐ श्रद्धाशब्दोपलक्षितभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ

६ ॐ अथहैनमितित्युक्तभूतावियोगप्रयोज्यसार्थक्यवत्साधनगम्याय नमः ॐ

७ ॐ वैराग्यादिव्यतिरिक्तकर्मागम्याय नमः ॐ

८ ॐ अवश्यानुष्ठेयवैराग्यादिसाधनगम्याय नमः ॐ

९ ॐ स्वर्गागतिक्लेशिताज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ

१० ॐ गतागतक्लेशिताज्ञानप्रयोज्यकाम्यकर्मवैराग्यगम्याय नमः ॐ

११ ॐ अज्ञानिमात्रसाधारणगतागतदुःखज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ

१२ ॐ भगवद्द्वेषादिगतिनित्यनिरयसाधनताज्ञानप्रयोज्यातिवैराग्यगम्याय नमः ॐ

१३ ॐ नरकगतसदुःखताज्ञानप्रयोज्यातिवैराग्यगम्याय नमः ॐ

१४ ॐ गत्यस्वातन्त्र्यप्रयोज्यवैराग्यगम्याय नमः ॐ

१५ ॐ अन्धेतमसिदुःखविशिष्टत्वज्ञानप्रयोज्यातिवैराग्यगम्याय नमः ॐ

१६ ॐ कर्मिगतधूमादिदेवताभावाप्रयोजकताज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ

१७ ॐ स्वर्गावरोहोत्तराचिरगर्भवासप्राप्तिज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ

१८ ॐ व्रीह्यादिभावनिरासप्रयोज्यप्रामाण्यवद्वेदविहितवैराग्यगम्याय नमः ॐ

१९ ॐ स्वर्गावरोहोत्तरपितृप्रवेशज्ञानप्रयोज्यवैराग्यगम्याय नमः ॐ

२० ॐ पितृद्वारा मातृयोनिप्रवेशज्ञानसाध्यातिवैराग्यगम्याय नमः ॐ

इति तृतीयाध्यायस्य प्रथमः पादः

ॐ भक्तिलक्षणसाधनगम्याय नमः ॐ

१ ॐ भक्तिप्रयोजकस्वप्ननियामकत्वमहिम्ने नमः ॐ

२ ॐ भक्तिप्रयोजकस्वप्नतिरोधाननियामकत्वमहिम्ने नमः ॐ

३ ॐ भक्तिप्रयोजकजाग्रत्प्रवर्तकत्वमहिम्ने नमः ॐ

४ ॐ भक्तिप्रयोजकसुप्तप्राप्यत्वमहिम्ने नमः ॐ

५ ॐ भक्तिप्रयोजकसुप्तप्रबोधकत्वमहिम्ने नमः ॐ

६ ॐ भक्तिप्रयोजकसर्वजीवसम्बन्धिसार्वकालिकसर्वावस्थानियामकत्वमहिम्ने नमः ॐ

७ ॐ भक्तिप्रयोजकावान्तरावस्थासंस्थितजीवप्राप्यत्वमहिम्ने नमः ॐ

८ ॐ भक्तिप्रयोजकस्वगतभेदशून्यत्वापादकनिर्दोषत्वाशेषगुणपूर्णत्वमहिम्ने नमः ॐ

९ ॐ भक्तिप्रयोजकाप्राकृतरूपवत्वमहिम्ने नमः ॐ

१० ॐ भक्तिप्रयोजकजीवाभेदशून्यत्ववते नमः ॐ

११ ॐ जीवगतस्वसादृश्याभिव्यञ्जनात्मकफलबङ्गक्तिगम्याय नमः ॐ

१२ ॐ भक्तिकर्तव्यताप्रयोजकभक्त्यनुसारिफलदातृत्ववते नमः ॐ

१३ ॐ भक्तिप्रयोजकपालकत्वरूपमहामहिम्ने नमः ॐ

१४ ॐ भक्तिप्रयोजकस्वतोऽव्यक्तत्वमहिम्ने नमः ॐ

१५ ॐ भक्तिप्रयोजकगुणित्ववते नमः ॐ

१६ ॐ भक्तिप्रयोजकालौकिकगुणवत्वमहिम्ने नमः ॐ

१७ ॐ भक्तिप्रयोजकब्रह्माद्यानन्दादिबिम्बानन्दादित्ववते नमः ॐ

१८ ॐ भक्तिप्रयोजकपुरुषप्रयत्नजन्यध्यानगोचरविलक्षणत्वप्रयुक्ताव्यक्तत्वमहिम्ने नमः ॐ

१९ ॐ भक्तिप्रयोजकसार्वदेशिकसार्वकालिकसृष्ट्यादिकर्तृत्ववते नमः ॐ

२० ॐ भक्तिप्रयोजककर्मफलदातृत्वमहिम्ने नमः ॐ

इति तृतीयाध्यायस्य द्वितीयः पादः

ॐ उपासनालक्षणसाधनगम्याय नमः ॐ

१ ॐ सर्ववेदनिर्णयोत्पाद्यज्ञानविषयाय नमः ॐ

२ ॐ सर्वगुणोपासंहारात्मकोपासनागोचराय नमः ॐ

३ ॐ पुरुषयोज्यताभेदव्यवस्थितोपसंहारानुपसंहारयोज्यगुणवते नमः ॐ

४ ॐ महाफलदबहुगुणोपसंहाररूपोपासनागोचराय नमः ॐ

५ ॐ सर्वमुमुक्षुसाधारणचतुर्गुणोपासनाजन्यापरोक्षज्ञानगोचराय नमः ॐ

६ ॐ प्रियशिरस्त्वादिगुणाविषयकसर्वमुमुक्षुसाधारणोपासनागम्याय नमः ॐ

७ ॐ चतुर्गुणसर्वगुणेतरदेवकर्तृकोपसंहारयोज्यमध्यमगुणाश्रयाय नमः ॐ

८ ॐ स्वनामरूपसर्वविद्याप्रतिपाद्योपसंहर्तव्यानुपसंहर्तव्यसर्वगुणवते नमः ॐ

९ ॐ आत्मशब्दोदितचतुर्गुणोपासनाधीनापरोक्षज्ञानगोचराय नमः ॐ

१० ॐ चतुर्मुखतदितराधिकारिसापेक्षात्मशब्दकारणकाभिधानयोग्यसर्वगुणाल्पगुणवते नमः ॐ

११ ॐ ध्यातव्यालौकिकगुणवते नमः ॐ

१२ ॐ स्वसदृशफलदोपासनाजन्यदर्शनाविषयाय नमः ॐ

१३ ॐ युगपदात्मशब्दोदितसर्वगुणोपासनागम्याय नमः ॐ

१४ ॐ देवादिमात्रोपास्यसम्भृतिद्युव्याप्तिमते नमः ॐ

१५ ॐ सर्वशाखाविप्रकीर्णापेक्षितसर्वगुणोपासनजापरोक्षगोचराय नमः ॐ

१६ ॐ यत्याद्ययोज्यहिंसादिफलकसर्वानधिकारिकभेदनाद्युपासायोज्याय नमः ॐ

१७ ॐ मुक्तावप्यनुवर्तमानोपासनागोचराय नमः ॐ

१८ ॐ अनियतमुक्तकर्तृककर्मेज्याय नमः ॐ

१९ ॐ ज्ञानोत्तरमोक्षनियमप्रयोज्यनिश्शङ्कोपासाविषयाय नमः ॐ

२० ॐ मौक्तानन्दतारतम्यप्रयोजकोपासनाधिकारिनियतिमदुपास्याय नमः ॐ

२१ ॐ अधिकार्यग्रेसरप्राणोपास्यसर्वगुणोपाश्रयाय नमः ॐ

२२ ॐ सर्वाधिकार्युत्तमप्राणोत्तमाय नमः ॐ

२३ ॐ सत्योपर्युपदिष्टविज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाहङ्कारात्मस्वरूपाय नमः ॐ

२४ ॐ भगवद्दर्शनसाधनोपासनानधिकारिरमोपास्याय नमः ॐ

२५ ॐ श्रवणमननध्यानात्मकसमस्तोपासनासाध्यपरोक्षगोचराय नमः ॐ

२६ ॐ प्रसादपूर्वकगुरुप्रदानपूर्वकश्रवणादिरूपोपासनागोचराय नमः ॐ

२७ ॐ वलीयस्तमगुरुप्रसादरूपेतिकर्तव्यतायुक्तश्रवणाद्युपासनागोचराय नमः ॐ

२८ ॐ पूर्वप्राप्तानधिकारवत्त्ववद्भिन्नसमग्रानुग्रहकर्तृगुरुप्रसादयुतोपासागोचराय नमः ॐ

२९ ॐ कर्माद्यसाध्यज्ञानसाध्यप्राप्तिकर्मणे नमः ॐ

३० ॐ बलवच्छ्रुतिलिङ्गोपपत्तिवचनबोधितमोक्षसाधनत्ववज्ज्ञानविषयाय नमः ॐ

३१ ॐ हरिगुरुभक्तिशमदमाद्युपेतगुरुप्रसादयुतोपासागोचराय नमः ॐ

३२ ॐ विविधोपासनासाध्यविविधज्ञानविषयाय नमः ॐ

३३ ॐ महरादिमात्रप्रापकसामान्यदर्शनातिरिक्तबिम्बदर्शनप्राप्याय नमः ॐ

३४ ॐ भक्तिसामर्थ्याप्रयोज्यस्वप्रसादैकसाध्यापरोक्षगोचराय नमः ॐ

३५ ॐ इन्द्रार्जुनाद्यंशांश्यभेदप्रयोज्यानादियोज्यतासापेक्षोपासागोचराय नमः ॐ

३६ ॐ यथायोज्याङ्गदेवतोपासनायुक्तोपासनागम्याय नमः ॐ

३७ ॐ भूमत्वेन सर्वमुमुक्षूपास्यानन्दादिमते नमः ॐ

३८ ॐ अधिकारितारतम्यानुसारप्रतीतिमङ्गमत्वोपासनागोचराय नमः ॐ

३९ ॐ दूरितादिनिवृत्तिफलकवैकल्पिकनृसिंहाद्युपासनासहितबिम्बोपासनाप्राप्याय नमः ॐ

४० ॐ अर्थादिकामसाधनवैकल्पकोपासनयोज्यगुणवद्रूपविशेषाय नमः ॐ

४१ ॐ देवताधिकारिकतत्तदङ्गप्राप्तिफलकतत्तदङ्गाश्रितत्वोपासागोचराय नमः ॐ

४२ ॐ सर्वशाखास्वनुक्तत्वप्रयुक्तसर्वोपास्यताहीनाङ्गाश्रितत्वोपासागोचराय नमः ॐ

इति तृतीयाध्यायस्य तृतीयः पादः ॥

ॐ अपरोक्षज्ञानाख्यसाधनगम्याय नमः ॐ

१ ॐ सर्वपुरुषार्थसाधनत्वमहिमोपेतज्ञानविषयाय नमः ॐ

२ ॐ सर्वानधिकारिकत्वमहिमोपेतज्ञानगोचराय नमः ॐ

३ ॐ दौर्लभ्यवत्सम्पूर्णाधिकारविषयज्ञानप्राप्यायनमः ॐ

४ ॐ असत्प्रवृत्तावपि मोक्षसाधनत्वनियमलक्षणमहिमोपेतज्ञानसाध्यप्राप्तिकर्मणे नमः ॐ

५ ॐ योज्यैकसाध्यत्वमहिमोपेतज्ञानसाध्यप्राप्तिकर्मणे नमः ॐ

६ ॐ देवादिपदाकांक्षाशून्यैरेव प्राप्यत्वमहिमोपेतज्ञानप्राप्याय नमः ॐ

७ ॐ अस्वामिनोऽपि सन्निधिमात्रेण फलदानरूपमहिमोपेतज्ञानप्राप्याय नमः ॐ

८ ॐ यतीनामेव ज्ञानाधिकारातिशयप्रयुक्तकर्माधिकातिशयोपेतज्ञानप्राप्याय नमः ॐ

९ ॐ अतिगोप्यत्वमहिमोपेतज्ञानसाध्यप्राप्तिमते नमः ॐ

१० ॐ प्रतिबन्धाभावे साधनसम्पत्तिजन्मन्येवोदयवज्ज्ञानसाध्यप्राप्तिमते नमः ॐ

११ ॐ स्वोत्पत्तिजन्मानन्तरमेव प्रतिबन्धाभावे मुक्तिसाधनत्वमहिमोपेतज्ञानविषयाय नमः ॐ

इति तृतीयाध्यायस्य चतुर्थः पादः

ॐ स्वदर्शनसाध्यस्वप्रसादद्वारकस्वप्राप्तिमते नमः ॐ

ॐ कर्मक्षयसाधनापरोक्षज्ञानविषयाय नमः ॐ

१ ॐ अवश्यम्भाविनित्यशःकार्यश्रवणाद्यावृत्तिसाध्यज्ञानगोचराय नमः ॐ

२ ॐ नित्यशः कर्तव्यस्वनिष्ठात्मत्वोपासनसाध्यज्ञानगोचराय नमः ॐ

३ ॐ आवश्यकविष्णुप्रतीकैक्योपासनवर्जनप्रयोज्यसर्वस्वामित्वोपासनसाध्य-
ज्ञानगोचराय नमः ॐ

४ ॐ अवश्यकर्तव्यब्रह्मत्वोपासनासाध्यदर्शनविषयाय नमः ॐ

५ ॐ तत्तदङ्गाश्रितत्वेन देवतोपासनसाध्यापरोक्षविषयाय नमः ॐ

६ ॐ आसनादिनियमपूर्वकध्यानसाध्यज्ञानविषयाय नमः ॐ

७ ॐ प्रायणाख्यमोक्षपर्यन्तं ध्यानसाध्यज्ञानविषयाय नमः ॐ

८ ॐ कर्मक्षयलक्षणफलसिद्धिसम्पादकज्ञानविषयाय नमः ॐ

इति चतुर्थाध्यायस्य प्रथमः पादः

ॐ देवतासम्बन्धिस्वोत्तमदेहलयतदन्यसम्बन्धिब्रह्मनाड्युत्क्रमणै-
तदुभयसाधनज्ञानविषयाय नमः ॐ

१ ॐ वाचो मनसि लयप्रयोज्यस्वप्राप्तिमते नमः ॐ

२ ॐ मनसः प्राणे लयप्रयोज्यस्वप्राप्तिमते नमः ॐ

३ ॐ स्वस्मिन्प्राणलयप्रयोज्यस्वप्राप्तिमते नमः ॐ

४ ॐ समस्तभूतेषु देवतालयप्रयोज्यस्वप्राप्तिमते नमः ॐ

५ ॐ अग्नावेव सर्वदेवतालयासम्भवप्रयुक्तसर्वभूताधिकरणकलयप्रयोज्यस्वप्राप्तिमते नमः ॐ

६ ॐ नित्यमुक्तप्रकृतिलयाधिकरणाय नमः ॐ

७ ॐ मोक्षे चतुर्मुखेतरदेवैरपि प्राप्याय नमः ॐ

८ ॐ मुक्तावपि स्वाधीनदेवताकाय नमः ॐ

९ ॐ अज्ञमरणविलक्षणज्ञानिमनुष्यसम्बन्धिदेहोत्क्रमणप्रयोज्यमुक्तिदात्रे नमः ॐ

१० ॐ अवश्यकर्तव्यगत्यनुस्मरणसाध्यस्वप्राप्तिमते नमः ॐ

इति चतुर्थाध्यायस्य द्वितीयः पादः

ॐ ब्रह्मनाड्युत्क्रान्तज्ञानिसम्बन्ध्यर्चिरादिमार्गप्राप्याय नमः ॐ

१ ॐ अर्चिःप्राथम्यकमार्गगम्याय नमः ॐ

२ ॐ द्वितीयप्राप्यवायुकमार्जगम्याय नमः ॐ

३ ॐ संवत्सरानन्तरप्राप्यतटित्कमार्गगम्याय नमः ॐ

४ ॐ द्वितीयप्राप्याऽऽतिवाहिकवायुमन्मार्गगम्याय नमः ॐ

५ ॐ अन्तिमप्राप्यमुख्यवायुमन्मार्गगम्याय नमः ॐ

६ ॐ ज्ञान्यनुस्मरणीयगम्यरूपपरब्रह्मणे नमः ॐ

इति चतुर्थाध्यायस्य तृतीयः पादः

ॐ चतुर्मुखेन सह स्वप्राप्तिमतां भोगप्रदाय नमः ॐ

१ ॐ मुक्तानां स्वानतिक्रमेण स्वसमीप एव भोगदाय नमः ॐ

२ ॐ सौषुप्तिकाहरहः प्राप्तिविलक्षणमुक्तिकालीनप्राप्तिमतामेव सम्यक् स्वरूपानन्दाभिव्यक्तिप्रदाय नमः ॐ

३ ॐ मुक्तप्राप्यपरञ्ज्योतिःस्वरूपपरब्रह्मणे नमः ॐ

४ ॐ सायुज्यभाजामपि स्वभुक्तभोगभोक्तृत्वप्रयुक्तसर्वभोक्तृत्ववते नमः ॐ

५ ॐ मुक्तानां चिद्देहेन भोगभोक्तृत्वसामर्थ्यप्रदाय नमः ॐ

६ ॐ सङ्कल्पमात्रसाध्यभोगभोक्तृमुक्तसङ्घपरिवृताय नमः ॐ

७ ॐ स्वाधमनियामकराहित्येन भोगवन्मुक्तसङ्घपरिवृताय नमः ॐ

८ ॐ बाह्यदेहराहित्यप्रयुक्तनिर्दुःखभोगानुभववन्मुक्तसङ्घपतिर्वृताय नमः ॐ

९ ॐ जगत्सृष्ट्यादीतरसर्वकामावाप्तिमन्मुक्तसङ्घपरिवृताय नमः ॐ

१० ॐ वृद्धिह्रासरहितैकप्रकारानन्दानुभवितृमुक्तगणनिषेविताय नमः ॐ

११ ॐ पुनरावृत्तिशून्यस्वप्राप्तिमन्मुक्तौघावृताय नमः ॐ

ॐ विरक्तिभक्त्युपास्तिजनितस्वसाक्षात्कारोदितस्वप्रसाद
साध्याशेषपुरुषार्थप्रवरकैवल्यप्राप्तिसाधनाशेष
गुणपूर्णत्वनिर्दोषत्वोभयप्रकारकमननरूपजिज्ञासागोचर
परममङ्गलमूर्तिश्रीनारायणाय नमः ॐ

इति चतुर्थाध्यायस्य चतुर्थः पादः

इति श्रीमद्ब्रह्मसूत्राधिकरणप्रतिपाद्यार्थवक्त्या

नारायणनमनं कृतमित्यशेषमतिमङ्गलम्

इति श्रीमत्कविकुलतिलक श्रीमज्जाविसमीर श्रीमद्वादिराजयतिकृता

श्रीमद्ब्रह्मसूत्रार्थनिबद्धनामावलिः समाप्ता

२२३ अधिकरणानि ।

अभयसंस्तवः

यस्मान्मयि दयालुस्त्वमाभिमुख्यं पुराऽकरोः ।
तस्मात्कदाऽपि कुत्रापि कुतोऽपि न भयं मम ॥ १॥

त्वद्दयार्द्रदृशा दृष्टा ब्रह्माद्या लोकपालताम् ।
अगमन्निगमोद्धर्तः क्व दैन्यं क्व च ते दया ॥ २॥

यं पासि त्वं किम्पुरुषे सोऽत्र साक्षी कपीश्वरः ।
तथा विभीषणः साक्षी दिवि साक्षी ध्रुवो ध्रुवः ॥ ३॥

भुवोऽधस्ताद्बलिः साक्षी यद्द्वार्यद्यापि वर्तसे ।
धरा च साक्षिणी या प्राग्वराहवपुषोद्धृता ॥ ४॥

वेदश्च साक्षी यद्ग्रन्थं बिभर्षि करपङ्कजे ।
गिरिश्च मन्दरः साक्षी देवाश्चाध्वनि चूर्णिताः ॥ ५॥

भवः साक्षी भस्मदैत्यभस्मीकरणविक्रम ।
दक्षस्साक्षी रक्षितो यस्त्वया देवर्षिसंसदि ॥ ६॥

द्रौपदी च तथा साक्षिण्यक्षयाम्बरदायक ।
सौभद्रस्य सुतः साक्षी यं द्रौण्यस्त्रादजीवयः ॥ ७॥

सुधादृष्टिमृताशेषस्वसैन्योज्जीवनैकद ।
कपिसेना साक्षिणी सा प्रह्लादाजामिळावपि ॥ ८॥

भूयो भूयः साहचर्याद्व्यासिर्निर्णीयते किल ।
अतस्त्वं नियमेनासि भक्तानां भयभञ्जनः ॥ ९॥

अकृतश्चिद्भयं प्राह यतस्ते पादसेवनम् ।
स्मृतिर्भागवताख्या तद्व्यासिरासोक्तितोऽप्यभूत् ॥ १०॥

दशदिक्षु गताऽसङ्ख्यः सतां भयजिहीर्षया ।
दशश्लोक्या वादिराजश्चकाराभयसंस्तवम् ॥ ११॥

इति श्रीमद्वादिराजपूज्यचरणविरचितः अभयसंस्तवः सम्पूर्णः

अष्टमहिषीयुक्तकृष्णस्तोत्रम्

हृद्गुहाश्रितपक्षीन्द्रवल्गुवाक्यैः कृतस्तुते ।
तद्गरुत्कन्धरारूढ रुक्मिणीश नमोऽस्तु ते ॥ १॥

अत्युन्नत्याऽखिलैः स्तुत्य श्रुत्यन्तात्यन्तकीर्तित ।
सत्ययोजित सत्यात्मन् सत्यभामापते नमः ॥ २॥

जाम्बवत्याः कम्बुकण्ठालम्बिजृम्भिकराम्बुज ।
शम्भुत्र्यम्बकसम्भाव्यं साम्बतात नमोऽस्तु ते ॥ ३॥

नीलाय विलसद्भूषाजालायोज्ज्वलमालिने ।
लोलालकोद्यत्फालाय कालिन्दीपतये नमः ॥ ४॥

जैत्रचित्रचरित्राय शात्रवानीकमृत्यवे ।
मित्रप्रकाशाय नमो मित्रविन्दाप्रियाय ते ॥ ५॥

बालानेत्रोत्सवानन्तलीलालावण्यमूर्तये ।
नीलाकान्ताय ते भक्तावालायाऽस्तु नमोनमः ॥ ६॥

भद्राय स्वजनाविद्यानिद्राविद्रावणाय वै ।
रुद्राणीभद्रमूलाय भद्राकान्ताय ते नमः ॥ ७॥

रक्षिताखिलविश्वाय शिक्षिताखिलरक्षसे ।
लक्षणापतये नित्यं भिक्षुश्लाघ्याय ते नमः ॥ ८॥

षोडशस्त्रीसहस्रेशं षोडशातीतमच्युतम् ।
ईडेत वादिराजोक्तप्रौढस्तोत्रेण सन्ततम् ॥ ९ ॥

इति श्रीमद्वादिराजयतिकृतं

अष्टमहिषीयुक्तकृष्णस्त्रोत्रं सम्पूर्णम्

अवतारत्रयस्तोत्रम्

मध्वहृत्कमलस्थितं वरदायकं करुणाकरं
लक्ष्मणाग्रजमक्षयं दुरितक्षयं कमलेक्षणम् ।
रावणान्तकमव्ययं वरजानकीरमणं विभुं
अञ्जनासुतपाणिकञ्जनिषेवितं प्रणमाम्यहम् ॥
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तु ते ॥ १॥

देवकीतनयं निजार्जुनसारथिं गरुडध्वजं
पूतनाशकटासुरादिखलान्तकं पुरुषोत्तमम् ।
दुष्टकंसनिमर्दनं वररुग्मिणीपतिमच्युतं
भीमसेनकराम्बुजेन सुसेवितं प्रणमाम्यहम् ॥
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तु ते ॥ २॥

ज्ञानमुक्तिसुभक्तिदं वरबादरायणमव्ययं
कोटिभास्करभासमानकिरीटकुण्डलमण्डितम् ।
वाक्सुदर्शनतः कलेः शिरघातकं रमया युतं
मध्वसत्करकञ्जपूजितमक्षयं प्रणमाम्यहम् ॥
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तु ते ॥ ३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

अवतारत्रयस्तोत्रं सम्पूर्णम्

आपादस्तोत्रम्

मध्वादृतं रजतपीठपुराधिवासं
हृद्यं मुदेऽस्तु मुरमर्दनपादपद्मम् ।
सद्योऽभिजातसुसरोजनवावभास-
स्पर्धिप्रभाविभवदीपितदिक्प्रदेशम् ॥ १॥

उद्यन्नखेन्दुरुदयं हृदि नस्तनोतु
मध्वागमोत्सवमहाङ्कुरपोषहेतुः ।
पद्मोपरिस्फुरितमौक्तिकचारुभाव-
प्रद्वेष्यघौघतिमिरप्रशमाय विष्णोः ॥ २॥

जङ्घायुगं जनयतु श्रियमन्वहं मे
तुङ्गेन्दिराकरसरोरुहरङ्गसङ्गि ।
सञ्जातपल्लवितचारुलतापरीत-
स्तम्भोपमानपरमन्दिरमच्युतस्य ॥ ३॥

ऊरुद्वयं सततमुच्चपदं ददातु
श्रीरूप्यपीठनिलयस्य हरेर्हरेड्यम् ।
वृत्तावलम्बिकरिपोतमृदुप्रपुष्ट-
हस्तद्वयप्रतिममप्रतिमस्य तस्य ॥ ४॥

पीनं हरेरुदरमादरतस्स्मरामि
ज्ञानात्मकस्य नवनीतजगन्निकेतम् ।
आनन्दतीर्थनयनाभिधमीनमान्य-
श्रीनिम्ननाभिसरसीरुचिरं चिरं तत् ॥ ५॥

वक्षस्थळं विशदहारविराजि विष्णो-
र्लक्ष्मीविशालगृहमस्तु ममान्तरङ्गम् ।
नक्षत्रराजिसुविराजिनिशेशबिम्ब-
लक्ष्म्याम्बरोपममपारगुणाम्बुराशेः ॥ ६॥

रत्नौघचञ्चुफणपञ्चकभोगिभोगं
स्वस्पर्धिजेतुमिव दण्डसुपाशधारी ।

सत्कङ्कणाङ्गदसुशोभशुभांगुलीयं
हस्तद्वयं मम तनोत्वभयं मुरारेः ॥ ७॥

वक्त्रालकं वरनसोज्जवलकुण्डलाभ्यां
युक्तं त्रिरेखिगलमुन्नतमौलिबन्धम् ।
वक्त्रं विभोर्मधुपमौक्तिकमत्स्यसङ्ख-
शैवालशालिकमलद्युति मेऽक्षिण भूयात् ॥ ८॥

अम्लानपद्मदलमात्मरुचाऽनुकुर्व-
दाम्नायकोविदबुधेष्टकृतप्रचारम् ।
रम्यं विलोचनयुगं श्रितमीक्षतां मां
सन्मध्वपूजितपदाब्जयुगस्य तस्य ॥ ९॥

मुग्धाननेन नयनेन करेण नाभि-
च्छिद्रेण पादयुगलेन धृताब्जसाम्यम् ।
पद्मालयोज्झति कदाऽपि न देवमेनं
मध्वप्रियं त्विति किमत्र गिरां विचारैः ॥ १०॥

आपादमा च मकुटान्मुरवैरिणोऽत्र
स्तोत्रं तदेतदनवद्यमवद्यजैत्रम् ।
गोपालवाजिमुखकिङ्करवादिराज-
प्रोक्तं पठन् भवति तत्सदयाक्षिलक्ष्यम् ॥ ११॥

इति श्रीमद्वादिराजयतिप्रोक्तमापादस्त्रोत्रं सम्पूर्णम्

उक्तिप्रत्युक्तिस्तोत्रम्

अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी खगपतिरसि किं नो हरिः किं कपीन्द्र-
स्त्वित्येवं गोपकन्याप्रतिवचनजडः पातु मां पद्मनाभः ॥ १॥

कृष्ण त्वं क्व गतोऽसि चाद्य मृगयासक्तो वनान्तं गतो
गन्धोऽन्यो वनपुष्पजः श्रमजलं धर्मक्षतं कण्टकैः ।
अस्त्वेवं मृगया तु केनचिदहो दष्टोऽधरो दृश्यते
शङ्खापूरणमत्र कारणमिदं कुर्यां प्रमाणानि ते ॥ २॥

अम्भस्ते शयनीयमेतदुदधेर्लीलोपधानं फणी
त्वत्तेजः परमाणुरेष दहनो भृत्यास्समस्तास्सुराः ।
कुक्षिन्यस्तसमस्तभारजगतः किं स्यात्तुलारोपणे
व्यर्थं वाच्यमिदं स्त्रियोपहसितः स्मेरो हरिः पातु नः ॥ ३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

उक्तिप्रत्युक्तिस्तोत्रं सम्पूर्णम्

ऋणमोचनस्तोत्रम्

देवताकार्यसिद्ध्यर्थं सभास्तम्भसमुद्भवम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ १ ॥

लक्ष्म्यालिङ्गितवामाङ्गं भक्तानां वरदायकम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ २ ॥

आन्त्रमालाधरं शङ्खचक्राब्जायुधधारिणम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ३ ॥

स्मरणात्सर्वपापघ्नं कद्रूजविषनाशनम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ४ ॥

सिंहनादेन महता दिग्दन्तिभयनाशनम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ५ ॥

प्रह्लादवरदं श्रीशं दैत्येश्वरविदारणम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ६ ॥

क्रूरग्रहैः पीडितानां भक्तानामभयप्रदम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ७ ॥

वेदवेदान्तयज्ञेशं ब्रह्मरुद्रादिवन्दितम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ८ ॥

य इदं पठते नित्यमृणमोचनसंज्ञितम् ।
अनृणीं जायते सद्यो धनं शीघ्रमवाप्नुयात् ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

ऋणमोचनस्तोत्रं सम्पूर्णम्

एकादशीनिर्णयः

एकादशीं वृथा घ्नन्ति केचिदास्माकपण्डिताः ।
तेशां लुप्त्यै कर्मकृत्तै कृष्णप्रीत्यै यतामहे ॥ १॥

अरुणोदयवेलायां दशमी यदि दृश्यते ।
पापमूलं तदा ज्ञेयमेकादश्युपवासनम् ॥ २॥

चतस्रो घटिकाः प्रातररुणोदय उच्यते ।
इत्याचार्यवचः स्मार्तं तद्विरोधोऽस्ति नः किल ॥ ३॥

इति विप्रतिपन्नानामुत्तरं दातुमारभे ।
स्यादेतद्यदि मध्वोक्ते चतुष्के दशमीस्पृशि ॥ ४॥

उपवासं परदिने कुर्मस्तन्मार्गगा वयम् ।
तत्पूर्वघटिकामात्रवेधेऽपि त्यजतां तिथिम् ॥ ५॥

तत्यागः सुतरां यस्मादस्माकमकुतोभयम् ।
अनुक्तोऽयं कुतः पन्था इति शङ्कान्तरं यदि ॥ ६॥

तर्ह्यनुक्तिविरोधोऽयं तत्राप्युत्तरमारभे ।
प्रमाणान्येव संगृह्णन्नाचार्यः स्वाशयं त्विमम् ॥ ७॥

शिष्यायोपदिशन्ग्रन्थे न बबन्ध सदग्रणीः ।
कृष्णाष्टमीकल्पकर्त्रा मध्वेनादर्शितं यथा ॥ ८॥

तिथ्यन्ते पारणं शुष्कादाचारात्तद्वदस्त्विदम् ।
साम्यमात्रविवक्षायामग्रे प्रववृते स्मृतिः ॥ ९॥

द्विमुहूर्तमनाध्याय इति साम्यवचो यथा ।
न्यायप्राप्तो विशेषोऽयं नाङ्गीकार्यः कथं बुधैः ॥ १०॥

न हि वृद्धौ क्षये साम्ये तिथीनामेकरूपता ।
वृद्धौ साम्ये क्षये चोषस्त्रिचतुःपञ्चनाडिकाः ॥ ११॥

इत्यादिस्मृतिवाक्येषु वैरूप्यस्यैव दर्शनात् ।
यत एकत्र निर्णीतः शास्त्रार्थो ह्यपरत्र च ॥ १२॥

संक्षेपविस्ताराभ्यां हि प्रवदन्ति मनीषिणः ।
यथा सामान्यशब्दार्थं चतुष्पदविबोधितम् ॥ १३॥

आदाय कालभेदेन विशेषं च वदद्वचः ।
न विरुद्धं तथाऽऽर्योक्तसामान्यवचनं त्विदम् ॥ १४॥

साम्ये ह्रासे समादाय वृद्धिमात्रप्रभेदकम् ।
विशेषं दर्शयद्वाक्यं विरुद्धं नैव धीमतः ॥ १५॥

न हि द्विलिप्तिकामात्रं तत्कालत्वावबोधकम् ।
घाटिकात्रिकमात्रं तु वृद्धौ ह्रासे तु पञ्चकम् ॥ १६॥

कस्मादनाध्यायतायां हेतुरित्येव चिन्त्यताम् ।
वृद्धावुन्मुखता तिथ्याः ह्रासेऽवाङ्मुखता तथा ॥ १७॥

अतस्त्रिकं वृद्धिगतं भविष्यति चतुष्टयम् ।
ह्रासे तथा पञ्चकं स्यादिदि कृत्वैव चोदना ॥ १८॥

एव सति महावृद्धौ दशमी षष्ठगाऽपि या ।
स्यादेव सप्तमस्यान्तपर्यन्ता न्यायसाम्यतः ॥ १९॥

तथा च श्रीमदाचार्यवचनोल्लङ्घनाङ्गयम् ।
अनाश्रिताप्ततच्छिष्यवचनस्य भवेत्तव ॥ २०॥

नास्माकं तत्कृपाभाजां तच्छिष्यकरुणाबलात् ।
किं च पञ्चाशतः षष्ठघटिका व्यापिनी यदा ॥ २१॥

दशमी तद्दिनं त्वं च मुञ्चस्येवाविशङ्कितः ।
अतो वेलापदं ह्येतत्पूर्वकालस्य वाचकम् ॥ २२॥

अनिच्छताऽपि स्वीकार्यं नीरादेरप्रसक्तितः ।
नो चेन्मध्वोक्तयवज्ञाता पूर्वकालेऽपि तां त्यजन् ॥ २३॥

भयभाक् स्यास्य नः कालस्सप्तमी घटिका यतः ।
वृता सामान्यशब्दस्य विशेषार्थपरिग्रहात् ॥ २४॥

कथं नार्योक्तमार्गेण श्रेयांस्तस्य परिग्रहः ।
पूर्वापरत्वं षष्ठ्यर्थस्सम्बन्धः सहभाविता ॥ २५॥

आनन्तर्यं चेति वाचा जयार्यस्यैव निश्चितम् ।
शिष्टाचारात्स्मृतिः कल्प्या दृष्टा सामान्यवागसौ ॥ २६॥

तन्मूलार्थं त्यजेन्नैव निर्मूलं तद्विरोधिनम् ।
यतो मुहूर्तशब्दोऽयं साधिके घटिकाद्वये ॥ २७॥

अपि शक्तस्ततोऽस्माकं न विरोध्यपरं वचः ।
किं च टीकाकृतोक्तोऽर्थो मूलस्यातिप्रशस्यते ॥ २८॥

न ह्यक्ष्यादित्ययोरैक्यादित्यस्यैकविधत्वतः ।
इति टीकोदितोऽन्योऽर्थः परित्याज्यो विपश्चिता ॥ २९॥

एवं चेन्मध्वशिष्येण साक्षाट्टीकाकृता कृता ।
त्रिविक्रमाचार्यवर्येण मर्यादेयं किमुच्यते ॥ ३०॥

न च तत्कृतपद्यत्वे शङ्कात्रोत्थातुमर्हति ।
देशान्तरस्थविदुषामैतिह्याख्यप्रमाणतः ॥ ३१॥

पान्त्स्मानिति पद्यस्य वन्दे वन्द्यमिति स्तुतेः ।
अन्यथा मध्वकृतितानिर्णयः किं कृतस्तव ॥ ३२॥

साक्षाच्छ्रीमध्वशिष्याणां नवाना जयसन्मुनेः ।
टीकाकारस्य मार्गोऽयं हेयो वाचा कथं द्वयोः ॥ ३३॥

जानन्त्यमी न किं सर्वे कृष्णामृतमहार्णवम् ।
नैतादृशी तिथिस्तेशां काले किं काऽपि नाभवत् ॥ ३४॥

गुरवस्ते किं नु मूकाः शिष्या वा द्रोहिणो गुरोः ।
लक्ष्मीनारायणमुनेर्व्यासतीर्थार्ययोगिनः ॥ ३५॥

विबुधेन्द्रमुनेर्वंशो जयरीर्थादिरेव हि ।

बलवत्वं प्रतिज्ञाय बहुत्वाच्च स्वभावतः ॥ ३६॥

प्रबलस्य विरोधेन दुर्बलस्यैव हेयताम् ।
शिक्षतो मध्वमार्गस्य गतिस्ते कण्टकायदे ॥ ३७॥

बह्वागमविरोधेषु ब्राह्मणेषु विवादिषु ।
उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ॥ ३८॥

इत्याचार्यवचः साक्षात्यक्तं सर्वात्मना त्वया ।
बहुदुष्टविरोधेऽपि यतः पूर्वैव सेव्यते ॥ ३९॥

एकाऽतिद्वादशीवृद्धौ नो चेद्वृद्धौ तु षोडश ।
ह्येकलिप्ती समे ह्रासे चतुष्कादुत्तरं त्विदम् ॥ ४०॥

अतिवृद्धावष्टयुगं वृद्धावष्ट समे चतुः ।
ह्येकलिप्ती समे ह्रासे चतुष्कादुत्तरं त्विदम् ॥ ४१॥

अस्यार्थः कथ्यते पूर्वविद्वच्छिक्षानुसारतः ।
एकातिद्वादशीवृद्धौ नो चेदित्येकवाक्यता ॥ ४२॥

वृद्धौ तु षोडशेत्येतदपरं तत्परं परम् ।
आदिपादस्यादिवाक्यं द्वितीयस्य द्वितीयकम् ॥ ४३॥

वाक्यं द्वितीयपद्येऽस्मिन् तृतीयस्य तृतीयकम् ।
षट्पञ्चघटिकावृद्धिरतिवृद्धिरिहोच्यते ॥ ४४॥

एकद्वित्र्यात्मका वृद्धिः समवृद्धिरिति स्मृता ।
चतुष्कान्मूलवाक्योक्तघटिकानां चतुष्टयात् ॥ ४५॥

उत्तरं पूर्वकाले तु ज्ञेयेत्थं दशमी तिथिः ।
अतिवृद्धौ न चेत्साम्यवृद्धौ तद्वेधवर्जिता ॥ ४६॥

घटिकैका यदि भवेच्छुद्धा सा सकला तिथिः ।
लिप्तिर्विघटिकाः पञ्च लिप्तयो द्वादशैव तु ॥ ४७॥

घटिकैकेति विज्ञेया ज्योतिःशास्त्रप्रमाणतः ।
पञ्चाशदुत्तरा षष्ठी घटिकैकाऽथ लिप्तयः ॥ ४८॥

चतस्रः पञ्चमीप्रान्तभागात्मकतया स्थिताः ।
एवं शोडश पूर्वोक्ता दशमीवेधवर्जिताः ॥ ४९ ॥

यदि स्युर्लिप्तयस्तर्हि शुद्धा सा सकला तिथिः ।
समे द्विलिप्तिकामात्रं ह्रासे त्वेकैव सा मता ॥ ५० ॥

चतुष्कादुत्तरं त्वेतद्दशमीवेधवर्जनम् ।
महाह्रासेऽधिका शुद्धिरल्पह्रासे तु विद्धता ॥ ५१ ॥

अपि स्यादिति सा शङ्का लिप्तिमात्रमशोधयत् ।
एवं सति तदाऽप्युक्ता लिप्तिरेका पराऽपि च ॥ ५२ ॥

ह्रासत्वावगतेरस्याः साम्यपक्षोपमैव हि ।
अतिवृद्धावष्टयुगमष्टद्वन्द्वं हि षोडश ॥ ५३ ॥

लिप्तयो वेधहीनाः स्युर्वृद्धौ सत्यां समे दिने ।
सति साम्ये न वृद्धिश्चेदिति यावत्तदष्टकम् ॥ ५४ ॥

चतुष्टयं च लिप्तीनामेवं द्वादश लिप्तयः ।
घटिकैका भवेत्सर्वा दशमीवेधवर्जिता ॥ ५५ ॥

अन्यत्स्पष्टं लिप्तिमात्राश्रयाच्छ्लोकोऽयमुत्तरः ।
इति श्रीमध्वकृपया हयग्रीवस्य किङ्करः ।
एकादशीं निर्णिनाय वादिराजो यतिः स्फुटम् ॥ ५६ ॥

इति श्रीमत्कविकुलतिलक श्रीमद्भाविसमीर

श्रीमद्वादिराजपूज्यचरणविरचितः एकादशीनिर्णयः समाप्तः

कुरुस्तुतिः

(लकारविभक्त्येकतास्तुतिः)

व्याकुर्वनिलसच्छास्त्रं स्वीकुर्वस्यैव सन्मतम् ।
हीकुर्वन्यमताचार्यान् मा कुर्वच्युतविस्मृतिम् ॥ १॥

न त्वंकुरु गुरून्पूजयन् नाहंकुरु कदाचन ।
अलंकुरु च दुर्गोष्ठीं नालंकुरु हरेः कथाम् ॥ २॥

अलंकुरु ततो वाचं न हुंकुरु सभान्तरे ।
अङ्गीकुरु हरिं नित्यं नमस्कुरु च सत्कुरु ॥ ३॥

नाङ्गीकुरु हरेः श्रेष्ठमङ्गीकुरु परान्सुरान् ।
ऊरीकुरु सदा व्याख्यामुररीकुरु सज्जनान् ॥ ४॥

दूरीकुरु च दुःशास्त्रं नारीकुरु हरेः कथाम् ।
आविष्कुरु च सत्तत्वं तिरस्कुरु मतान्तरम् ॥ ५॥

पुरस्कुरु शुभश्रेणीमधःकुरु च दुष्कृतम् ।
अन्तःकुरु हरेश्चिन्तां बहिष्कुरु कलेर्भटान् ॥ ६॥

पराकुरु परार्थाशां निराकुरु निराक्रियाम् ।
स्थिरीकुरु मनः कृष्णे तरीकुरु च तत्पदम् ॥ ७॥

धिक्कुरु श्रुतिनिन्दादीन् न्यक्कुरूदरपूरणम् ।
त्रिःकुरु स्नानसन्ध्यार्च्याः स्वःकुरु स्वकरे स्थितम् ॥ ८॥

उरः कुरु पुरं विष्णोः शिरः कुर्वस्य वन्दने ।
गिरः कुरु स्तुतावेवं धुरः सर्वाः परिष्कुरु ॥ ९॥

संस्कुर्वित्थं भवज्जन्म कैङ्कर्यं कुरु मापतेः ।
तं कुरु स्ववरं भक्त्याऽस्तंकुरूग्रं भवार्णवम् ॥ १०॥

सदोपकुरु साधूनां नैवापकुरु कस्यचित् ।
नाथैर्विकुरु कुत्रापि गुरोः प्रतिकुरु प्रियैः ॥ ११॥

स्वीकुरु श्रीमदाचार्यभाष्यामृतरसं सदा ।
फूत्कुर्वपरभाष्यार्थतूलानि च पदे पदे ॥ १२॥

श्रुतं मतं हृदि ध्यातं साक्षात्कुरु हरिं प्रभुम् ।
प्रसन्नीकुरु मुक्तीश्च सिद्धाः कुरु चतुर्विधाः ॥ १३॥

मुक्तोऽप्यस्वास्यपुर्यस्य परिचर्यां मुदा कुरु ।
बन्दीकुरु हरेर्भक्तिं मन्दीकुरु पुनर्भवम् ॥ १४॥

हर्येकनिष्ठतासिध्यै वादिराजो हरेः स्तुतौ ।
लकारस्य विभक्तेश्च धातोरप्येकतां व्यधात् ॥ १५॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

(लकारविभक्त्येकता) कुरुस्तुतिः सम्पूर्णा

कृष्णरामावतारचरितरत्नसंग्रहः

क्षीराम्बुधौ फणिपतेर्मृदुभोगशय्या-
शायी रमाकरसरोरुहलालिताङ्घ्रिः ।
आनन्दमूर्तिरखिलामरमौलिरस्मान्
नानावतारजितदैत्यजनः स पायात् ॥ १॥

ब्रह्मेशशक्रमुखदेववरार्थितो यः
श्रीदेवकीतनयतामधिगम्य गोष्ठे ।
प्राक्पूतनाशकटवातविनाशकारी
भूत्वा बभञ्ज शिशुरर्जुनपादपौ द्वौ ॥ २॥

तत्रोत्थितौ स्वशरणावनुगृह्य गोपी-
गेहेषु दुग्धनवनीतदधीनि भुक्त्वा ।
वृन्दावनं प्रतिगतोऽथ निहत्य वत्स-
दैत्यं बकं च निजकाळियशिक्षकोऽभूत् ॥ ३॥

दत्वाऽभयं च पुनरत्र निशि प्रवृद्धं
पीत्वा दवाग्निमथ गोकुलमुग्रवृष्टेः ।
गोवर्धनोच्चगिरिमेककरेण बिभ्र-
द्बालोऽभिरक्ष्य विमदेन्द्रकृतार्हणोऽभूत् ॥ ४॥

रासोत्सवे व्रजवधूभिरथो विहृत्य
स्वानन्दमूर्तिरवधीन्निशि चन्द्रचूडम् ।
पश्चादरिष्टमथ केशिवधं विधाय
साकं बलेन मधुरां नगरीं जगाम ॥ ५॥

कुब्जासुदामवरदो रजकं निहत्य
छित्वा धनुः स निहतेभवरोऽथ मल्लान् ।
कंसं च संसदि विमृद्य मुदं स्वपित्रो-
र्दत्वा जरासुतबलं बहुशो जघान ॥ ६॥

द्वारावतीं पुरमथो विरचय्य तस्यां
बन्धून्निधाय यवनं मुचुकुन्ददृष्ट्या ॥

दग्ध्वाऽथ भीष्मकसुतादिनिजाष्टपत्नी-
हस्तं प्रगृह्य मुरजिन्नरकं ममर्द ॥ ७॥

कन्यासहस्रवरतां प्रतिपद्य देवान्
निर्जित्य कल्पतरुमात्मपुरं निनाय ।
प्रद्युम्नमुख्यतनयान्सुबहून्स सृष्ट्वा
कृष्णोऽथ पौण्ड्रकमुखासुरमर्दनोऽभूत् ॥ ८॥

संसाध्य धर्मतनयस्य स राजसूयं
हत्वाऽथ तत्र शिशुपालमथाग्रपूजाम् ।
जग्राह तीर्णवनवासमहाम्बुराशेः
पार्थस्य सारथिरभूत्कुरुभूमियुद्धे ॥ ९॥

दुर्योधनं सह बलेन विनाश्य पार्थान्
कृत्वा क्रमेण चतुरन्तधराधिनाथान् ।
निष्कण्टकैर्निजजनैः सहितः सपुत्र-
पौत्रः शशास जगतीं जगदेकनाथः ॥ १०॥

हत्वा पूतनिकां विभज्य शकटं वातं निहत्यार्जुनौ
छित्वा वत्सबकौ विनाश्य फणिजित्पीतानलः पर्वतम् ।
धृत्वा गोपवधूः प्रतोष्य जनकार्तिघ्नो वृषं केशिनं
जित्वाऽर्वीं प्रणतां विधाय धनुरुच्छिद्येभमल्लानहन् ॥ ११॥

कंसारिर्जितमागधो यवनजित्स्वीयाष्टपत्नीपतिः
हत्वोग्रं नरकं वधूततिवृतो जित्वाऽमरान्स्वस्तरुम् ।
लब्ध्वा पौण्ड्रककाशिराजशिशुपालघ्नः कुरूणां बलं
दग्ध्वा सारथिरर्जुनस्य जगतीं कृष्णः शशास प्रभुः ॥ १२॥

कृष्णः पूतनिकारिरस्तशकटो वातान्तकः पादप-
च्छेत्ता वत्सबकाहिजिद्धृतगिरिर्गोपीष्टदोऽरिष्टहृत् ।
केशिघ्नो हतमल्लकंसयवनक्ष्माजादिरात्मबला-
साहस्तोऽर्जुनसारथिः कुरुबलं हत्वा ररक्ष क्षितिम् ॥ १३॥

कौसल्यासुत ताटकामथ मखत्रातर्मुनिस्त्रीहित
च्छिन्नेष्वासन जानकीवृत वनावासिन् खराद्यन्तक ।
मारीचघ्न हनूमदीश रविजार्तिच्छेद बद्धाम्बुधे
सेनाभ्रातृसमेत रावणरिपो सीतेष्ट रामाव माम् ॥ १४॥

संगृह्य पद्यमयसूत्रवरेण कृष्ण-
रामावतारचरिताभिधरत्नराशिम् ।
तद्भक्तभूसुरकृतेऽकृत वादिराज-
भिक्षुः पठत्कविकदम्बककण्ठभूषाम् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

कृष्णरामावतारचरितरत्नसंग्रहः समाप्तः

कृष्णस्तुतिः

यदि दिशसि नयनपटुतां तर्हि भवच्चरणकमलसेवायै ।
आयास्यामि दयाळो कृष्ण न चेत् पूजयामि कथमन्धः ॥ १॥

सम्भावितस्य पुंसो मरणादतिरिच्यते किला कीर्तिः ।
इति गीतासु हि गीतं भवता भवतापतिमिर रवे ॥ २॥

नानापराधशतकं हीने यद्यस्ति कृष्ण मयि मत्ते ।
दीनानामुद्धर्त्रा क्षन्तव्यं तत् क्षमावता भवता ॥ ३॥

कुन्तलसन्ततिलसितं चूडात्रयशोभिमौलिभागमहम् ।
शतपत्रपत्रनेत्रं शशिवदनं प्रतिदिनं दिदृक्षामि ॥ ४॥

कुण्डलमण्डितगण्डं कम्बुग्रीवं मनोरमोरस्कम् ।
दण्डं दाम च दधतं पाण्डवसखमर्च्यमर्चयामि कदा ॥ ५॥

रम्यतमोदरजघनं कम्रोरुं वृत्तजानुयुगजङ्घम् ।
रक्ताब्जसदृशपादं हस्ताभ्यां त्वार्चयामि सदय कदा ॥ ६॥

दोषातिदूर शुभगुणराशिं दासीकृताखिलानिमिषम् ।
भूषणभूषितगात्रं नेत्राभ्यां चित्रचरित वीक्षे त्वाम् ॥ ७॥

मध्वप्रतिष्ठितं त्वां विध्वस्ताशेषकुजनकुलम् ।
मूर्ध्ना प्रणम्य याचे तद्विरचय यद्धितं ममाद्य हरे ॥ ८॥

स्तुतिमितिपुण्यकथन ते प्रथितकृते वादिराजयतिरकृत ।
सततं पठतां हि सतामतिविशदां देहि कृष्ण विततमतिम् ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

कृष्णस्तुतिः सम्पूर्णम्

कृष्णस्तुतिः

हितं न जानाम्यहितं न जाने नाकर्तुमीशो नच कर्तुमीशः ।
यथा नटान्नाटकदारुयन्त्रं तथा हरेः प्रेरणयैव वर्ते ॥ १॥

यदभूत्तद्धरेर्यच्च नाभूत्तच्च हरेः परात् ।
जीवो विष्टिगृहीतोऽस्मात्किं भवेत्किं च नो भवेत् ॥ २॥

कर्मणो यदि तत्कर्म स्वानिष्टं कुरुते कुतः ।
अनाद्यनिष्टकर्माणि करोत्यन्यवशो ध्रुवम् ॥ ३॥

नित्यो जीवोऽस्वतन्त्रश्चेदनित्यं कर्म जन्मनि ।
स्थितौ लये परापेक्षमन्याधीनं कथं न तत् ॥ ४॥

यत इत्येकवचनादेको दाधार चेत्यलम् ।
स्पष्टश्रुतेर्न कर्माणि कर्मद्वारा न चेतनाः ॥ ५॥

अनन्ताः सर्वजगतां कर्तारो लाघवादपि ।
लोकेऽदृष्टद्वारकर्तृमात्रात्क्वापि क्रियाजनेः ॥ ६॥

कृतिपूर्वककर्तैव कर्ताऽन्यस्तूपचारतः ।
अन्यथा कन्यकायाः स्याज्जर्ताऽपि पितृवत्पिता ॥ ७॥

अतो नामुख्यकर्त्रैव महाकार्यमिदं भवेत् ।
किं स्त्रीपुंसोर्विनाऽपि स्यात्पुत्रः पुत्रेष्टिमात्रतः ॥ ८॥

न चेदुपादानमपि तद्वत्स्यादौपचारिकम् ।
दृष्टानुसारतस्तच्चेत्कर्ताऽपि स्यात्तथैव हि ॥ ९॥

अदृष्टमपि बीजाद्यं कल्प्यं फलबलाद्यथा ।
तथाऽदृष्टोऽपि कर्ताऽस्य कल्प्यः कोऽप्युरुशक्तिमान् ॥ १०॥

न च कालादिकं तस्य प्रेरकं जडवस्तुनः ।
स्वतः प्रवृत्त्ययोगेन प्रेर्यत्वात्कर्तृतोऽन्यतः ॥ ११॥

नापि तत्प्रेरको ब्रह्मा नेशो नेन्द्रोऽपरे कुतः ।
अंघ्र्यर्चनेन तत्तीर्थजुष्ट्या तद्दत्तभूत्वतः ॥ १२ ॥

किंच सृज्यं वशे स्रष्टुर्हार्यं हर्तुर्वशे परम् ।
पातुर्वशे स्थितं सर्वमतो विष्णोर्वशेऽखिलम् ॥ १३ ॥

न पिताऽधिपतिर्नॄनाँ न हर्ता यामकोऽपि वा ।
किंतु रक्षक एवातो विष्णुरेव जगत्पतिः ॥ १४ ॥

दशदिक्पतिभावेन देवा ब्रह्मेशपूर्वकाः ।
खण्डाधिपतयो विष्णुस्तदभावाज्जगत्पतिः ॥ १५ ॥

अस्य देवस्येति वेदे यथा विष्णोर्वशे हरः ।
स्पष्टं श्रुतस्तथा वेदे न ङ्कापीशवशे हरिः ॥ १६ ॥

श्रौतो लब्धपदः सोमो नेशो वेदविदां मते ।
विश्वाधिकत्वगीः सावकाशेन्द्रादिश्रुताविव ॥ १७ ॥

सोऽरोदीदिति वेदे हि रोदनाद्रुद्रतोदिता ।
न ते महित्वमिति तु विष्णोरसमतोदिता ॥ १८ ॥

या ह्युच्छेषणभागो वै रुद्र इत्याह वेदवाक् ।
जुषेथां यज्ञमित्याद्या सा विष्णुं वक्त्यतस्स राट् ॥ १९ ॥

प्रलये वटपत्रेऽप्सु शेते नारायणः किल ।
तदा ङ्कान्ये सुरास्तस्मात्सर्वेशो विष्णुरेव हि ॥ २० ॥

किंच गीतोपनिशदि सर्वं द्विपुरुषाख्यया ।
संगृहीतं हरिस्त्वेकः पुरुषोत्तम ईरितः ॥ २१ ॥

रामः प्रभूरामभृत्या देवाः सर्वेऽपि वानराः ।
कृष्णः प्रभुः कृष्णभृत्या देवा धर्मात्मजादयः ॥ २२ ॥

अर्हत्तमो ह्यग्रपूजामर्हत्यन्यो न संसदि ।
यथैवेह तथाऽमुत्र तद्विष्णुरखिलप्रभुः ॥ २३ ॥

तस्मात्सर्वेश्वरो विष्णुः सर्वं सर्वत्र सर्वदा ।
प्रवर्तयति सर्वत्र सर्वशक्तिः सनातनः ॥ २४ ॥

यद्भूतं भूतमेतस्माद्भवच्च भवति प्रभोः ।
भाव्यं भविष्यतीह्यस्य कृपया नान्यतः क्वचित् ॥ २५ ॥

अतः सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये ।
तमर्च्यमर्चय स्तुत्यं स्तुहि नम्यं नमाच्युतम् ॥ २६ ॥

वादिराजयतिप्रोक्तमेवं कृष्णस्तवं नवम् ॥
पठन् सर्वेष्टमाप्नोति सर्वानिष्टनिवृत्तिमान् ॥ २७ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

श्रीकृष्णस्तुतिः सम्पूर्णा

कृष्णस्तोत्रम्

श्रीब्रह्मरुद्रगरुडेन्द्रनतं शरण्यं
सर्वाशुभप्रशमनं भुवनैकनाथम् ।
सद्रूप्यपीठपुरमध्यगमिन्दिरेशं
गोवर्धनोद्धरणदक्षमहं नतोऽस्मि ॥ १॥

वज्राङ्कुशध्वजसरोजयुतांघ्रिमूलं
सन्दीप्यमाननखचन्दिरकान्तिकान्तम् ।
सिञ्जत्सुनूपुरपदं वरवृत्तजङ्घं
पूर्णेन्दुभानुसमवर्तुलजानुयुग्मम् ॥ २॥

स्तम्बेरमेन्द्रसुकरोरुमुदारकाञ्ची-
पीताम्बरोद्यतकटिं शुभनिम्ननाभिम् ।
शातोदरार्पितवलित्रयमब्जनाभं
श्रीवत्सकौस्तुभरमालयवक्षसं तम् ॥ ३॥

श्रीकम्बुकन्धरसमर्पितवैजयन्ती-
सद्धारकञ्जशुभमालिकयोल्लसन्तम् ।
सद्दण्डपाशकरमूर्जितहारभूषं
बिम्बाधरोष्ठमरविन्ददलायताक्षम् ॥ ४॥

कर्णोज्ज्वलन्मकरकुण्डलशोभिगण्डं
सद्रत्नमौक्तिकलसच्छुभनासिकाढ्यम् ।
शार्ङ्गायितभ्रुवमगण्यगुणाभिराम-
मुद्यद्दिवाकरनिभाभविशालफालम् ॥ ५॥

श्रीमत्किरीटवरमण्डितरम्यशीर्ष-
माद्यन्तशून्यमसितं सुखतीर्थनाथम् ।
श्रीनन्दनन्दनममेयमगाधभोध-
मीषत्स्मितेन्दुवदनं शरणं व्रजामि ॥ ६॥

किं संस्तवीमि तव मत्स्य सुकूर्म कोल
श्रीमन्नृशिंह वरवामन भार्गवेश ।

श्रीजानकीरमण यादवकृष्ण बुद्ध
कल्क्यादिरूप कृतिसेवितसत्प्रभाव ॥ ७॥

श्रीकृष्णदेव करुणाकर सौम्यरूप
श्रीवादिराजमुनिहृत्कमलाधिवास ।
भक्तोत्सवेप्सितसुतत्वरहस्यदीप
मां पाहि ते चरणसेवकभृत्यभृत्यम् ॥ ८॥

वादिराजाख्ययतिना कृष्णस्त्रोत्रमिदं कृतम् ।
हरेः कृपाप्तयेऽजस्त्रं पठतः प्रीयते हरिः ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

कृष्णस्तोत्रं सम्पूर्णम्

चक्रस्तुतिः

दोषौघवारणं यस्य धारणं मोक्षकारणम् ।
न वैदिकं तच्चक्रधारणं यदि मन्यसे ॥ १॥

ग्रन्थादौ मङ्गलं तर्हि कस्मान्नावैदिकं तव ।
शिष्टाचारात्स्मृतिः कल्प्या स्मृतेश्च श्रुतिकल्पना ॥ २॥

यदि तत्र तथैतस्मिन्किन्न कल्पयसि श्रुतिम् ।
द्वारकायायिभिस्सर्वैरद्यापि प्राक्प्रवेशतः ॥ ३॥

निम्बादित्यानुगैः प्राज्ञैर्मायावाद्येकदेशिभिः ।
विष्णुस्वामिमतस्थैश्च रामानुजमताश्रयैः ॥ ४॥

तत्ववादिजनाचार्यैः शिष्टश्रेष्ठैरनुष्ठिते ।
कैश्चिच्चीर्णमिदं नोचेत्यक्तं तदपि नास्तिकैः ॥ ५॥

बहुशिष्टजनाचारः प्रमाणमुभयत्र च ।
स्वमूलग्रन्थभागेषु तथा प्रकरणेषु च ॥ ६॥

निबन्धेषु च सर्वेषु केनापीदं न दूषितम् ।
अनाचारस्तु केषाञ्चिदनाचारः प्रकल्प्यताम् ॥ ७॥

त्यजेदेकं कुलस्यार्थमिति न्यायं विजानत ।
नृसिंहपरिचर्यायां रामार्चाचन्द्रिकादिषु ॥ ८॥

श्रुतिस्मृतिपुराणोक्तया तैरपीदं प्रसाधितम् ।
न नः पूर्वैः पराक्रान्तं सर्वसम्प्रतिपत्तितः ॥ ९॥

इदानीमाग्रहादेव विवदन्ते क्वचित्क्वचित् ।
दुराग्रहग्रहं तेषां केषाञ्चिन्मनसि स्थितम् ॥ १०॥

निवर्तयेत्सुप्रयुक्तः श्रौतो मन्त्रो महात्मभिः ।
अवैदिकमिदं चेत्ते ब्रह्मैक्यं वैदिकं कुतः ॥ ११॥

श्रुतयस्तत्र चेत्सन्ति न सन्ति किमिहागमाः ।
यद्येतेषामितोऽन्योऽर्थः कल्प्यते स्वकपोलतः ॥ १२ ॥

श्रुतिस्मृतिसमाख्यातस्तत्रान्यार्थो न किं श्रुतः ।
आग्रहोऽयं परेषां चेत्तथाऽयं किंतु नाग्रहः ॥ १३ ॥

वादिविप्रतिपन्नाभिः श्रौतत्वं तूभयोस्समम् ।
यद्यश्रौतमिदं कर्म यज्ञोऽश्रौतः कथं न ते ॥ १४ ॥

तन्मूलभूतवेदानामतत्वावेदकत्वतः ।
अन्यार्थकल्पनेनापि तत्ववेदकता गता ॥ १५ ॥

तेनैवावेदकत्वं चेदध्वरस्य कथं न तत् ।
अधुना बाधवैधुर्याद्व्यावहारिकमानता ॥ १६ ॥

समोभयत्र केषाञ्चिन्मते बाधोऽत्र तत्र च ।
वेदाप्रमाण्यशंसित्वादशिष्टौ तावुभावपि ॥ १७ ॥

व्यावहारिकमानत्वं मूढाप्रामाण्यमेव हि ।
अतप्तधारणं चेत्स्यात्तन्मूलेनैतदागतम् ॥ १८ ॥

सदा तदुक्तलाभार्थमिदं प्राज्ञैर्हिरण्मयी ।
पवित्रमुद्रेव कुशश्रुतिमूला प्रधार्यते ॥ १९ ॥

किमग्निनाऽपराद्धं ते किं चक्रेण मुरद्विषः ।
किं वा सद्भिरनिर्भीतैः किं पुराणैस्त्रयीगिरा ॥ २० ॥

निषेधवाक्याद्धीतिस्तु तप्ततप्ताङ्कयोस्समा ।
तत्सर्वं तप्तगं कुर्वन्समः स्वार्थपरार्थयोः ॥ २१ ॥

अमन्त्राहोममूलाङ्कविषयं कुरु लाघवात् ।
शिष्टाचारविरुद्धोऽर्थस्स्वसारं चाधिरोहति ॥ २२ ॥

इत्यादौ त्यज्यते वेदे किं पुनः स्मृतिकोणगः ।
यदि स्मृतिमनादृत्य श्रुतावनुदितत्वतः ॥ २३ ॥

विधिं न मानयस्येनं निषेधः केन मान्यते ।
नहि श्रुतिस्मृती धर्ममिमं क्वापि निषेधति ॥ २४ ॥

सुदर्शनकृतोद्योगनिष्कण्टकितपद्धतिः ।
तूष्णीं स्थितेऽपि लोकेऽस्मिन्नङ्गीकार इतीर्यते ॥ २५ ॥

शास्त्रेऽप्यप्रतिषिद्धं चेद्गीयतेऽनुमतं त्विति ।
यदि स्मृत्युक्तमाचारमश्रौतं मन्यते भवान् ॥ २६ ॥

शौचादौ दिग्विभागं च वैचित्र्यं मृत्तिकागृहे ।
योग्यायोग्यदिनत्वं च दन्तधावनकर्मणि ॥ २७ ॥

काष्ठे ग्राह्याग्राह्यतां च तथाऽऽचमनपद्धतिम् ।
गृह्योक्तं पार्वणविधिं भोज्याभिज्यपदार्थताम् ॥ २८ ॥

क्रमं षोडशसंस्कारे श्राद्धादीनां दिनान्यपि ।
तर्हि त्यक्त्वा व्रात्यदशामाश्रय त्वविशङ्कितः ॥ २९ ॥

सर्वधर्मान्परित्यज्येत्यादिवाक्यमुपाश्रितः ।
नारदीये बृहति ते बलं वाक्यचतुष्टयम् ॥ ३० ॥

पाद्मगारुडमुख्येषु सन्त्यस्माकं सहस्त्रशः ।
द्वैधे बहूनां वचनमिति न्यायेन तत्यजन् ॥ ३१ ॥

अङ्गीकुरु हरेश्चक्रधृतिं मुक्तिसृतिं पराम् ।
अष्टादशपुराणस्थान्यस्मद्वाक्यानि सर्वशः ॥ ३२ ॥

मुख्यान्युपपुराणस्थवाक्येभ्यो न हि बिभ्यति ।
पञ्चरात्रस्य विष्णूक्तेः सर्वैः प्रामाण्यमिष्यते ॥ ३३ ॥

प्रतिष्ठापर्वपूजाद्या देवानां स्युः कथं न चेत् ।
श्रुतिप्रतीकं संगृह्य पवित्राख्यां प्रदाय च ॥ ३४ ॥

तत्र प्रथमसंस्कारस्तप्तचक्राङ्क ईर्यते ।
तद्विरुद्धमृषिप्रोक्तं दुरुक्तमिति गृह्यते ॥ ३५ ॥

उभयोः कलहे साक्षी विजातीयो हि मान्यते ।

यच्छास्त्रं लिङ्गपारम्यं परं देवमुमापतिम् ॥ ३६॥

तमः प्रवर्तकं वक्ति तामसं तत्प्रचक्षते ।
इति गारुडवाक्येन तथा पाद्मगतेन च ॥ ३७॥

विष्ण्वाधिक्यविरोधित्वे पुराणस्मृतिविद्ययोः ।
अपि तामसतैवोक्ता ततोऽप्यन्यदुपेक्षताम् ॥ ३८॥

नहि तामसमाश्रित्य तमः प्राप्तुं त्वमर्हसि ।
श्रीमद्भागवतं सर्वैः पूर्वैर्नो भवतामपि ॥ ३९॥

पुराणेषूत्तमत्वेन श्रुतं मतमुपाश्रितम् ।
तत्रापि विष्णुमाहात्म्यरसायनविरोधिनाम् ॥ ४०॥

शैवोक्तिविषबिन्दूनां तामसत्वमुदाहृतम् ।
वाचं हीनां मया रक्षन् दुःखदुःखी भवेदिति ॥ ४१॥

शृण्वन्ति येऽन्यविषयाः कुकथा मतिनाशिनीः ।
ते तमः प्राप्नुवन्तीति वन्ध्यां न बिभृयाद्गिरम् ॥ ४२॥

इत्यादौ तेन चोक्तं नः सर्वं चार्वेव गम्यते ।
मल्लक्षणमिमं कायं कृत्वा मद्धर्ममाश्रितः ॥ ४३॥

स्वलिङ्गधारणेनेति तत्रोक्तं चक्रलाञ्छनम् ।
श्रुतितात्पर्यसिद्धेऽर्थे विरोधं कुर्वती स्मृतिः ॥ ४४॥

विरोधे त्वनपेक्षं स्यादित्यमानत्वमेष्यति ।
पवित्रं त इति ह्येका गोविन्दुर्बिभ्रदायुधम् ॥ ४५॥

येन देवाः पवित्रेण आत्मानं पुनन्ते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ॥ ४६॥

इत्याद्यपि यजुर्वेदे लोकस्य द्वारमित्यपि ।
चरणं पूतमिति च तथा साम्नि स्फुटं वचः ॥ ४७॥

नेमिना तप्तसुतनुः सायुज्यं प्राप्नुयादिति ।
उरुक्रमाङ्घ्रेः सुभगा वयमेभिरिहाङ्किताः ॥ ४८॥

इत्यथर्वगतं वाक्यं तथा श्रुतिशिरस्यपि ।
अद्यापि गौर्जरैर्विप्रैः पठ्यमाने गुरोर्मुखात् ॥ ४९ ॥

धृतोर्ध्वपुण्ड्रः श्रितसच्चक्रधारी हरिं परम् ।
यो ध्यायेत्स महात्मेति स्पष्टमर्थान्तरोज्झितम् ॥ ५० ॥

सन्ति स्मृतीतिहासाध्याः पुराणानि च कोटिशः ।
सुदर्शनस्य मीमांसा कृता ह्यस्मत्पुरातनैः ॥ ५१ ॥

तत्रोद्धृतेषु वाक्येषु कथमेतेषु संशयः ।
यदि वाक्यं स्वयं कृत्वा प्रावक्ष्यन्पूर्वसूरयः ॥ ५२ ॥

तर्ह्यर्च्यनेकभेदायां कुतो वाक्यं निजेच्छया ।
नाकरिष्यन्नतिस्पष्टमनर्थान्तरसम्भवम् ॥ ५३ ॥

प्रावर्तन्त कथं पूर्वे सर्वेऽप्यास्तिकमौलयः ।
सृष्टैर्वाक्यैर्न चेत्सर्वविस्रवः स्याज्जिनोक्तितः ॥ ५४ ॥

स वक्ति सर्वमाम्नायं रक्षसा केनचित्कृतम् ।
पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम् ॥ ५५ ॥

पर्यायवाचका ह्येते चक्रस्य परमात्मनः ।
पुराणोक्तिरियं चक्रं पवित्राद्याख्ययाऽऽह हि ॥ ५६ ॥

मर्त्यानुशासनं ग्राह्यं किं पुनः स्मार्तशासनम् ।
पविवत्रायते लोकानिति व्युत्पत्तिसम्भवात् ॥ ५७ ॥

योगरूढिबलायाता पवित्राख्या सुदर्शने ।
इमां श्रुतिमुपादाय पुराणान्येव सर्वशः ॥ ५८ ॥

प्रमाणयन्ति स्वोक्तेऽस्मिंस्तत्तच्चक्राङ्कधारणे ।
अतोऽन्यार्थः श्रुतेरस्याः कथं शक्यो मनीषिभिः ॥ ५९ ॥

सति नेतरि मार्गस्य किमन्धोक्तः क्रमो भवेत् ।
पवित्रपदनिदिष्टमर्थं वेदस्तमेव हि ॥ ६० ॥

सहस्रधारनामोक्त्या चक्रत्वं स्पष्टयत्यहो ।
षट्कोणत्वाभिधां चक्रच्छायामद्याप्युपाददत् ॥ ६१॥

कुशग्रन्थिरपि ह्यासीत्पवित्राख्यो महीतले ।
यथा चित्रस्थसिंहस्य सिंहसादृश्यमात्रतः ॥ ६२॥

सिंहतायां मुख्यसिंहो वन्य एवेति निर्णयः ।
तथा पवित्रनामैतच्चक्रस्यैवेति गम्यते ॥ ६३॥

षट्कोणता सर्वमते चक्रस्यैव हि लक्षणम् ।
आगमोक्तं पवित्रं च षट्कोणग्रन्थितोऽभवत् ॥ ६४॥

अतोऽन्यार्थकथा वाताहता शुष्कलताऽभवत् ।
तत्पवित्रमिदं व्याप्तं यत्वं पर्येपि विश्वतः ॥ ६५॥

इति श्रुत्युदितं विष्णुव्याप्त्या व्याप्तत्वमेव च ।
चक्रस्यैवोचितं विप्रकुशस्यात्यन्तबाधितम् ॥ ६६॥

प्राक्प्रसक्तपवित्रेण तप्ततप्तत्वमिष्यते ।
पञ्चाग्निकृततापोक्तौ दूषणद्वयमागतम् ॥ ६७॥

प्रसक्तस्य परित्यागो ह्यप्रसक्तपरिग्रहः ।
आमत्वोक्त्या तप्तचक्रदाहाभावो हि दूष्यते ॥ ६८॥

अग्निदूरसमीपस्थवस्तुन्यामत्वसाम्यतः ।
शृतास इति शब्दार्था दाहवन्तो न तापसाः ॥ ६९॥

पादोक्तौ स्यात्पवित्रेणेत्येतद्व्यर्थं पदान्तरम् ।
चक्रं प्रयुज्य निबिडं तमो निर्भिद्य रन्ध्रातः ॥ ७०॥

अनन्तासनलोकं स्वं प्राप कृष्णः सहार्जुनः ।
इति पौराणिकख्यात्या लोकस्य द्वारताऽपि च ॥ ७१॥

चक्रस्यैवोचिताऽनन्यत्र शक्योऽतोऽर्थो न शङ्कितुम् ।
अपि चार्थद्वये प्राप्ते समाख्यैकार्थसाधिका ॥ ७२॥

तत्पुराणसमाख्यानादर्थेऽयमवधार्यते ।

मीमांसाभिधविख्यातसीमासाम्राज्यकारिभिः ॥ ७३ ॥

यद्यप्याम्नायमार्गेऽस्मिन्वक्तुं बहु च शक्यते ।
तथाऽप्यल्परणोद्योगे योद्धुः शूरस्य नोचितम् ॥ ७४ ॥

महाप्राकारकरणमिति मत्वोपरम्यते ।
कुमतध्वान्तनिर्भेदी स्वमताम्भोधिसम्भ्रमः ॥ ७५ ॥

हयग्रीवोल्लसच्चन्द्रपादः खेदापहोऽस्तु नः ।
हयग्रीवपदद्वन्द्वचिन्तनासक्तचेतसा ।
यतिना वादिराजेन चक्रस्तुतिरियं कृता ॥ ७६ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

चक्रस्तुतिः सम्पूर्णा

चतुर्विंशतिमूर्तिभेदस्तोत्रम्

अधरं दक्षिणं हस्तमारभ्यैव प्रदक्षिणम् ।
मूर्तिभेदान्हरेर्वक्ष्ये भवबन्धविमुक्तये ॥ १॥

श्रीमत्पङ्कजशङ्खचक्रगदया सम्भूषिते केशवे
चक्राम्भोजगदासुदर्शनधरे नारायणे सर्वदा ।
भक्तिर्मेऽस्तु गदारिशङ्खजलजैर्युक्ते दृढा माधवे
गोविन्दे वरचक्रधारिणि गदाफुल्लाब्जशङ्खाङ्किते ॥ २॥

कौमोदक्यरविन्दशङ्खविदधच्चक्रं च विष्णुर्मुदा
चक्राङ्को मधुसूदनो दधदसौ शङ्खाब्जकौमोदकीः ।
नित्यं पद्मगदारिशङ्खसहितश्चित्ते मम त्रिक्रमो
युक्तस्तिष्ठतु शङ्खचक्रगदया पद्मी सदा वामनः ॥ ३॥

वन्दे श्रीधरमब्जचक्रगदया शङ्खेन चालङ्कृतो
नित्यं पाहि गदारिपङ्कजदरान् बिभ्रद्धृषीकेश माम् ।
शङ्खाब्जारिगदाधराद्य कुरु मे श्रीपद्मनाभाभयं
श्रीदामोदरमब्जशङ्खगदिनं सारिं प्रपन्नोऽस्म्यहम् ॥ ४॥

कौमोदक्युरुशङ्खपद्मसदरिः सङ्कर्षणः शर्मदो
भूयात्सोऽग्यगदादरारिकमलः श्रीवासुदेवोऽस्तु मे ।
प्रद्युम्नश्च रथाङ्गकम्बुगदया युक्तोऽब्जपाणिर्मुदे
चक्री चारुगदी सशङ्खकमलो देवोऽनिरुद्धोऽस्तु मे ॥ ५॥

देवेशः पुरुषोत्तमोऽरिकमलः शङ्खी गदी चिद्वपुः
बिभ्रत्पद्मगदोरुशङ्खमरिणा साकं सदाऽधोक्षजः ।
चक्राम्भोजगदादराङ्कितचतुर्बाहुर्नृसिंहः सुखं
दद्यादद्य ममाच्युतः पृथुगदापद्मारिशङ्खी परम् ॥ ६॥

साब्जारिः स जनार्दनोऽस्तु सदयः शङ्खी गदी मे सदा
मूर्ध्नोपेन्द्रमहं नतोऽस्मि सदरं युक्तं गदार्यम्बुजैः ।
वन्दे शङ्खसुदर्शनाम्बुजगदापाणिं हरिं मुक्तये
कृष्णं शङ्खगदाब्जचक्रिणमलं भक्त्या तमभ्यर्चये ॥ ७॥

वादिराजयतिप्रोक्तकेशवादिस्तुतिं नरः ।
पठन्सर्वेष्टमाप्नोति सर्वारिष्टनिवृत्तिमान् ॥ ८॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

चतुर्विंशतिमूर्तिभेदस्तोत्रं सम्पूर्णम्

चिन्ताखण्डनस्तोत्रम्

यया ते धर्मकामौ च यया ते व्यर्थमाजनि ।
किं तया चिन्तया जीव हन्ताहन्ताऽफला तव ॥ १॥

सुखमीशेच्छया नृणां दुःखं चापि तदिच्छया ।
न स्वेच्छया भवेत्किञ्चिद्धन्ताहन्ताऽफला तव ॥ २॥

अदतो मदतोऽन्धस्य जिह्वां बह्वाशिनो नर ।
सन्तः खादन्ति दन्तास्ते हन्ताहन्ताऽफला तव ॥ ३॥

महत्वे ते यदाऽऽकाङ्क्षा महत्वेव भयं तदा ।
जीव किं जीवनार्थेऽतश्चिन्तया चिन्तयाऽच्युतम् ॥ ४॥

महापद्यागतायां हि महापद्यार्थिनोऽधुना ।
हरिणा स्वैरिणा त्राताः किं न खिन्नकृपालुना ॥ ५॥

ममता येषु ते नित्यममतास्तेऽत एव हि ।
अहन्ता यत्र ते जीव न हन्ता तस्य किं यमः ॥ ६॥

न स्वेषां स्वेच्छयाऽकार्षीत्कष्टं वाऽत्यक्रमीदिह ।
नरो वाऽप्यथवा नारी सुरो वाऽप्यसुरोऽपि वा ॥ ७॥

स्वेष्टानाप्त्या रोदनेन ग"रुद्रो अरुदद्" इति श्रुतिः ।
नर्ते त्वत्क्रियते किञ्चिदित्याहान्याच्युतं प्रभुम् ॥ ८॥

पार्थान्पार्थसतीमार्तां हरं भस्मासुरार्दितम् ।
विरोचनस्य पितरं कः कष्टात्प्राग्व्यमोचयत् ॥ ९॥

शत्रवो यान्ति मित्रत्वं मितेऽमित्रे सतां हरौ ।
मित्राण्येव च शत्रुत्वं शत्रौ शत्रौ सुरद्विषाम् ॥ १०॥

पितुर्वधे पुत्र एव कारणं प्रागभूदिति ।
किं न श्रुतं सर्पवैरी सर्पस्यैवाभयङ्करः ॥ ११॥

दुःखास्पृष्टो हरिस्त्वेको दुःखस्पृष्टास्ततोऽपरे ।
अतो न भीतो दुःखेभ्यो भवानुभवधीरधीः ॥ १२ ॥

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
इति यन्नियमस्तस्मान्नियमे नियमं कुरु ॥ १३ ॥

अतो दुरन्तया स्वान्तचिन्तया किं चिदन्तया ।
हयाननं दयासिन्धुं स्मर स्मरदभीष्टदम् ॥ १४ ॥

आचतुर्दशमाद्वर्षाद्या चिन्ता हृदि देहिनाम् ।
वादिराजो यतिस्तस्याः खण्डनायेदमभ्यधात् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

चिन्ताखण्डनस्तोत्रं सम्पूर्णम्

त्रिविक्रमस्तोत्रम्

विदारितारिसङ्घातं पादाक्रान्तजगत्त्रयम् ।
गदाचक्रधरं धीरं सदा वन्दे त्रिविक्रमम् ॥ १॥

शङ्खाम्भोजकरद्वन्द्व हुङ्कारार्दितदानव ।
शङ्कातङ्कहराहं ते किङ्करोऽस्मि त्रिविक्रम ॥ २॥

क्षपाकरोल्लसद्वक्त्रं कृपाविपुललोचनम् ।
अपारसुगुणस्तोममुपासे तं त्रिविक्रमम् ॥ ३॥

रमाधराश्लिष्टपार्श्वं समस्तसुरसेवितम् ।
भ्रमादिदोषदूरं तं नमामि श्रीत्रिविक्रमम् ॥ ४॥

योऽङ्गादङ्गजमस्राक्षीद्गङ्गामङ्गुष्ठतोऽसृजत् ।
तुङ्गामरचयोत्तुङ्गं तं गायामि त्रिविक्रमम् ॥ ५॥

नानालङ्कारभरितं पीनावयवमोहनम् ।
ज्ञानानन्दमयं वन्दे श्रीनाथं तं त्रिविक्रमम् ॥ ६॥

वृन्दारकेन्द्रवन्द्यांघ्रिं नन्दितीर्थमुनेः प्रियम् ।
कन्दर्पकोटिलावण्यं तं ध्यायामि त्रिविक्रमम् ॥ ७॥

सुधाकुन्देन्दुधवलमधःकृतचराचरम् ।
उदारमादराद्वन्दे त्रिधामानं त्रिविक्रमम् ॥ ८॥

वेदान्तवेदितगुणं बोधप्रदमहर्निशम् ।
आधारं नौमि जगतां श्रीधामानं त्रिविक्रमम् ॥ ९॥

अनुयागेन बलिना मनुना मननेन च ।
दिनेदिनेऽर्चितं वन्दे मनसा तं त्रिविक्रमम् ॥ १०॥

सर्पिःपायसनैवेद्यैर्भक्ष्यैश्च विविधैः सदा ।
नृत्यवादित्रगीतैश्च तर्पयामि त्रिविक्रमम् ॥ ११॥

वादिराजेन्द्रवरदं सोदापुरनिवासिनम् ।
मोदप्रदं सदा वन्दे माधवं तं त्रिविक्रमम् ॥ १२॥

धूपैर्गन्धानुलेपैश्च दीपैरपि मनःप्रियैः ।
तापसैः पूजितं वन्दे श्रीपतिं तं त्रिविक्रमम् ॥ १३॥

योऽसौ धवलगङ्गायाः पार्श्वे तिष्ठति सर्वदा ।
देशेदेशे च विख्यातमासेवे तं त्रिविक्रमम् ॥ १४॥

अग्रे निधाय श्रीदेवीं पृष्ठे पार्श्वे च सज्जनान् ।
स्वर्गिभिः परितः सेव्यो मध्ये भाति त्रिविक्रमः ॥ १५॥

शिलामयै रम्यतमशालावलभिमण्डपैः ।
कलशैश्चोल्लसद्देवालये भाति त्रिविक्रमः ॥ १६॥

यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।
तावत्त्रिविक्रमः सोऽयं पूज्यस्तिष्ठतु सज्जनैः ॥ १७॥

इदं स्तोत्रं वादिराजो मुदे सज्जनसन्ततेः ।
व्यधत्त तेन प्रीतोऽस्तु सदा श्रीदस्त्रिविक्रमः ॥ १८॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

त्रिविक्रमस्तोत्रम् समाप्तम्

दशावतारस्तोत्रम्

नमोऽस्तु नीरायणमन्दिराय नमोऽस्तु हारायणकन्धराय ।
नमोऽस्तु पारायणचर्चिताय नमोऽस्तु नारायण तेऽर्चिताय ॥ १॥

नमोऽस्तु मत्स्याय लयाब्धिगाय नमोऽस्तु कूर्माय पयोब्धिगाय ।
नमो वराहाय धराधराय नमो नृसिंहाय परात्पराय ॥ २॥

नमोऽस्तु शक्राश्रयवामनाय नमोऽस्तु विप्रोत्सवभार्गवाय ।
नमोऽस्तु सीताहितराघवाय नमोऽस्तु पार्थस्तुतयादवाय ॥ ३॥

नमोऽस्तु बुद्धाय विमोहकाय नमोऽस्तु ते कल्किपदोदिताय ।
नमोऽस्तु पूर्णामितसद्गुणाय समस्तनाथाय हयाननाय ॥ ४॥

करस्थशङ्खोल्लसदक्षमालाप्रबोधमुद्राऽभयपुस्तकाय ।
नमोऽस्तु वक्त्रोद्गिरदागमाय निरस्तहेयाय हयाननाय ॥ ५॥

रमासमाकारचतुष्टयेन क्रमाच्चतुर्दक्षु निषेविताय ।
नमोऽस्तु पार्श्वद्वयगद्विरूपश्रियाऽभिशिक्ताय हयाननाय ॥ ६॥

किरीटपट्टाङ्गदहारकाञ्चीसुरत्नपीताम्बरनूपुरादैः ।
विराजिताङ्गाय नमोऽस्तु तुभ्यं सुरैः परीताय हयाननाय ॥ ७॥

विदोषकोटीन्दुनिभप्रभाय विशेषतो मध्वमुनिप्रियाय ।
विमुक्तवन्द्याय नमोऽस्तु विष्वग्विधूतविघ्नाय हयाननाय ॥ ८॥

नमोऽस्तु शिष्टेष्टदवादिराजकृताष्टकाभिष्टुतचेष्टिताय ।
दशावतारैस्त्रिदशार्थदाय निशेशबिम्बस्थहयाननाय ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

दशावतारस्तोत्रम् सम्पूर्णम्

दशावतारस्तुतिः

प्रोष्ठीशविग्रह सुनिष्ठीवनोद्भुत विशिष्टाम्बुचारिजलधे ।
कोष्ठान्तराहितविचेष्टागमौघ परमेष्ठीडित त्वमवमाम् ।
प्रेष्ठार्कसूनुमनुचेष्टार्थमात्मविदतीष्टो युगान्तसमये ।
स्थेष्ठात्मशृङ्गधृतकाष्ठाम्बुवाहन वराष्टापदप्रभतनो ॥ १॥

खण्डीभवद्बहुळडिण्डीरजृम्भण सुचण्डी कृतो दधि महा ।
काण्डाति चित्र गति शौण्डाद्य हैमरद भाण्डा प्रमेय चरित ।
चण्डाश्वकण्ठमद शुण्डाल दुर्हृदय गण्डा भिखण्डाकर दो-
श्चण्डा मरेशहय तुण्डाकृते दृशमखण्डामलं प्रदिश मे ॥ २॥

कूर्माकृते त्ववतु नर्मात्म पृष्ठधृत भर्मात्म मन्दर गिरे ।
धर्मावलम्बन सुधर्मासदाकलितशर्मा सुधावितरणात् ।
दुर्मान राहुमुख दुर्मायि दानवसुमर्माभिभेदन पटो ।
धर्मार्क कान्ति वर वर्मा भवान् भुवन निर्माण धूत विकृतिः ॥ ३॥

धन्वन्तरेऽङ्गरुचि धन्वन्तरेऽरितरु धन्वन्स्तरीभवसुधा-
भान्वन्तरावसथ मन्वन्तराधिकृत तन्वन्तरौषधनिधे ।
दन्वन्तरङ्गशुगुदन्वन्तमाजिषु वितन्वन्ममाब्धि तनया ।
सून्वन्तकात्महृदतन्वरावयव तन्वन्तरार्तिजलधौ ॥ ४॥

या क्षीरवार्धिमथनाक्षीणदर्पदितिजाक्षोभितामरगणा-
पेक्षाप्तयेऽजनि वलक्षांषुबिम्बजिदतीक्ष्णालकावृतमुखी ।
सूक्ष्मावलग्नवसनाक्षेपकृत्कुच कटाक्षाक्षमीकृतमनो-
दीक्षासुराहृतसुधाक्षाणिनोऽवतुसु रूक्षेक्षणाद्धरितनुः ॥ ५॥

शिक्षादियुङ्निगम दीक्षासुलक्षण परिक्षाक्षमाविधिसती ।
दाक्षायणी क्षमति साक्षाद्रमापिनय दाक्षेपवीक्षणविधौ ।
प्रेक्षाक्षिलोभकरलाक्षार सोक्षित पदाक्षेपलक्षितधरा ।
साऽक्षारितात्मतनु भूक्षारकारिनिटिलाक्षाक्षमानवतु नः ॥ ६॥

नीलाम्बुदाभशुभ शीलाद्रिदेहधर खेलाघृतोधधिधुनी-
शैलादियुक्त निखिलेला कटाद्यसुर तूलाटवीदहन ते ।

कोलाकृते जलधि कालाचलावयव नीलाब्जदंष्ट्र धरणी-
लीलास्पदोरुतर मूलाशियोगिवर जालाभिवन्दित नमः ॥ ७॥

दम्भोलितीक्ष्णनख सम्भेदितेन्द्ररिपु कुम्भीन्द्र पाहि कृपया ।
स्तम्भार्भ कासहनडिम्भाय दत्तवर गम्भीरनाद नृहरे ।
अंभोधिजानुसरणांभोजभूपवनकुम्भीनसेशखगराट् ।
कुम्भीन्द्रकृत्तिधर जम्भारिषण्मुखमुखांभोरुहाभिनुत माम् ॥ ८॥

पिङ्गाक्ष विक्रम तुरङ्गादि सैन्य चतुरङ्गा वलिप्त दनुजा-
साङ्गाध्वरस्थ बलि साङ्गावपात हृषिताङ्गा मरालिनुत ते ।
शृङ्गारपादनख तुङ्गाग्रभिन्न कन काङ्गाण्डपत्तितटिनी-
तुङ्गाति मङ्गल तरङ्गाभिभूत भज काङ्गाघ वामन नमः ॥ ९॥

ध्यानार्ह वामनतनोनाथ पाहि यजमाना सुरेशवसुधा-
दानाय याचनिक लीनार्थवाग्वशितनानासदस्यदनुज ।
मीनाङ्कनिर्मलनिशानाथकोटिलसमानात्म मौञ्जिगुण कौ-
पीनाच्छसूत्रपदयानातपत्रकरकानम्यदण्डवरभृत् ॥ १०॥

धैर्याम्बुधे परशुचर्याधिकृत्तखलवर्यावनीश्वर महा-
शौर्याभिभूत कृतवीर्यात्मजातभुजवीर्यावलेपनिकर ।
भार्यापराधकुपितार्याज्ञयागलितनार्यात्मसूगलतरो ।
कार्यापराधमविचार्यार्यमौघजयिवीर्यामिता मयि दया ॥ ११॥

श्रीरामलक्ष्मणशुकाराम भूरवतुगौरामलामितमहो-
हारामरस्तुत यशोरामकान्तिसुत नोरामनोरथहर ।
स्वारामवर्यरिपु वीरामयार्धिकर चीरामलावृतकटे ।
स्वाराम दर्शनजमारामयागतसुघोरामनोरमलब्धकलह ॥ १२॥

श्रीकेशवप्रदिशनाकेश जातकपिलोकेश भग्नरविभू-
तोकेतरार्तिहरणाकेवलार्तसुखधीकेकिकालजलद ।
साकेतनाथवरपाकेरमुख्यसुत कोकेन भक्तिमतुलाम् ।
राकेन्दु बिम्बमुख काकेक्षणापह हृशीकेश तेऽङ्घ्रिकमले ॥ १३॥

रामे नृणां हृदभिरामेनराशिकुलभीमे मनोऽद्यरमताम् ।
गोमेदिनीजयितपोऽमेयगाधिसुतकामेनिविष्ट मनसि ।
श्यामे सदा त्वयि जितामेयतापसजरामे गताधिकसमे ।
भीमेशचापदलनामेयशौर्यजितवामेक्षणे विजयिनि ॥ १४॥

कान्तारगेहखलकान्तारटद्वदन कान्तालकान्तकशरम् ।
कान्तारयाम्बुजनिकान्तान्ववायविधुकान्ताश्मभादिपहरे ।
कान्तालिलोलदलकान्ताभिशोभितिलकान्ताभवन्तमनुसा ।
कान्तानुयानजित कान्तारदुर्गकटकान्ता रमात्ववतु माम् ॥ १५ ॥

दान्तं दशाननसुतान्तं धरामधिवसन्तं प्रचण्डतपसा ।
क्लान्तं समेत्य विपिनान्तं त्ववाप यमनन्तं तपस्विपटलम् ।
यान्तं भवारतिभयान्तं ममाशु भगवन्तं भरेण भजतात् ।
स्वान्तं सवारिदनुजान्तं धराधरनिशान्तं स तापसवरम् ॥ १६ ॥

शम्पाभचापलवकंपास्तशत्रुबलसंपादितामितयशाः ।
शं पादतामरससंपातिनोऽलमनुकम्पारसेन दिश मे ।
सम्पातिपक्षिसहजं पापिरावणहतं पावनं यदकृथाः ।
त्वं पापकूपपतितं पाहि मां तदपि पम्पासरस्तटचर ॥ १७ ॥

लोलाक्ष्यपेक्षितसुलीलाकुरङ्गवधखेलाकुतूहलगते ।
स्वालापभूमिजनिबालापहार्यनुजपालाद्य भो जयजय ।
बालाग्निदग्धपुरशालानिलात्मजनिफालात्तपत्तलरजो ।
नीलाङ्गदादिकपिमालाकृतालिपथमूलाभ्यतीतजलधे ॥ १८ ॥

तूणीरकार्मुक कृपाणीकिणाङ्कभुजपाणीरविप्रतिमभाः ।
क्षोणिधरालिनिभघोणीमुखादिघनवेणीसुरक्षणकरः ।
शोणिभवन्नयन कोणीजिताम्बुनिधिपाणीरितार्हणमणि-
श्रेणीवृताङ्घ्रिरिह वाणीशसूनुवरवाणीस्तुतो विजयते ॥ १९ ॥

हुङ्कारपूर्वमथ टङ्कारनादमतिपङ्कावधार्यचलिता ।
लङ्काशिलोच्चयविशङ्कापतद्विदुर शङ्काऽऽस यस्य धनुषः ।
लङ्काधिपोऽमनुत यं कालरात्रिमिव शङ्काशताकुलधिया ।
तं कालदण्डशतसङ्काशकार्मुकशराङ्कान्वितं भज हरिम् ॥ २० ॥

धीमानमेयतनुधामार्तमङ्गळदनामा रमाकमलभू-
कामारिपन्नगपकामाहिवैरिगुरुसोमादिवन्द्यमहिमा ।
स्थेमादिनापगतसीमावतात्सखलसामाजरावणरिपू ।
रामाभिदो हरिरभौमाकृतिः प्रतनसामादिवेदविषयः ॥ २१ ॥

दोषात्मभूवशतुराषाडतिक्रमजदोषात्मभर्तृवचसा ।

पाषाणभूतमुनियोषावरात्मतनुवेषादिदायिचरणः ।
नैषादयोषिदशुभेषाकृदण्डजनिदोषाचरादिशुभदो ।
दोषाग्रजन्ममृतिशोषापहोऽवतु सुदोषाङ्घ्रिजातहननात् ॥ २२॥

वृन्दावनस्थपशुवृन्दावनं विनुतवृन्दारकैकशरणम् ।
नन्दात्मजं निहतनिन्दाकृदासुरजनं दामबद्धजठरम् ।
वन्दामहे वयममन्दावदातरुचिमान्दाक्षकारिवदनम् ।
कुन्दालिदन्तमुत कन्दासितप्रभतनुं दावराक्षसहरम् ॥ २३॥

गोपालकोत्सवकृतापारभक्ष्यरससूपान्नलोपकुपिता ।
शापालयापितलयापाम्बुदालिसलिलापायधारितगिरे ।
स्वापाङ्गदर्शनज तापाङ्गरागयुतगोपाङ्गनांशुकहृति-
व्यापारशौण्ड विविधापायतस्त्वमव गोपारिजातहरण ॥ २४॥

कंसादिकासदवतंसावनीपतिविहिंसाकृतात्मजनुषम् ।
संसारभूतमिह संसारबद्धमनसं सारचित्सुखतनुम् ।
संसाधयन्तमनिशं सात्त्विकव्रजमहं सादरं बत भजे ।
हंसादितापसरिरंसास्पदं परमहंसादिवन्द्यचरणम् ॥ २५॥

राजीवनेत्र विदुराजीव मामवतु राजीवकेतनवशम् ।
वाजीभपत्तिनृपराजीरथान्वितजराजीवगर्वशमन ।
वाजीशवाह सितवाजीश दैत्यतनुवाजीशभेदकरदोः ।
जाजीकदम्बनवराजीवमुख्यसुमराजीसुवासितशिरः ॥ २६॥

कालीह्रदावसथकालीयकुण्डलिपकालीस्थपादनखरा ।
व्यालीनवांशुकरवालीगणारुणितकालीरुचे जय जय ।
केलीलवापहृतकालीशदत्तवरनालीकदृप्तदितिभू-
चूलीकगोपमहिलालीतनूघुसृणधूलीकणाङ्कहृदय ॥ २७॥

कृष्णादिपाण्डुसुतकृष्णामनःप्रचुरतृष्णासुतृप्तिक रवाक् ।
कृष्णाङ्कपालिरत कृष्णाभिधाघहर कृष्णादिषण्महिळ भोः ।
पुष्णातु मामजित निष्णातवार्धिमुदनुष्णांशुमण्डल हरे ।
जिष्णो गिरीन्द्रधर विष्णो वृषावरज धृष्णो भवान्करुणया ॥ २८॥

रामाशिरोमणिधरामासमेत बलरामानुजाभिध रतिम् ।
व्योमासुरान्तकर ते मारतात दिश मे माधवाङ्घ्रिकमले ।
कामार्तभौमपुररामावलीप्रणयवामाक्षिपीततनुभा ।

भीमाहिनाथमुखवैमानिकाभिनुत भीमाभिवन्द्यचरण ॥ २९॥

सक्ष्वेळभक्ष्यभयदाक्षिश्रवोगणजलाक्षेपपाशयमनम् ।
लाक्षागृहज्वलनरक्षोहिडिम्बबकभैक्षान्नपूर्वविपदः ।
अक्षानुबन्धभवरूक्षाक्षरश्रवणसाक्षान्महिष्यवमती ।
कक्षानुयानमधमक्ष्मापसेवनमभीक्ष्णापहासमसताम् ॥ ३०॥

चक्षाण एव निजपक्षाग्रभूदशशताक्षात्मजादिसुहृदा-
माक्षेपकारिकुनृपाक्षौहिणीशतबलाक्षोभदीक्षितमनाः ।
ताक्ष्यांसिचापशरतीक्ष्णारिपूर्वनिजलक्ष्माणि चाप्यगणयन् ।
वृक्षालयध्वजरिरक्षाकरो जयति लक्ष्मीपतिर्यदुपतिः ॥ ३१॥

बुद्धावतार कविबद्धानुकम्प कुरु बद्धाञ्जलौ मयि दयाम् ।
शौद्धोदनिप्रमुखसैद्धान्तिकासुगमबौद्धागमप्रणयन ।
क्रुद्धाहितासुहृतिसिद्धासिखेटधर शुद्धाश्वयान कमला ।
शुद्धान्त मां रुचिपिनद्धाखिलाङ्ग निजमद्धाव कल्क्यभिध भोः ॥ ३२॥

सारङ्गकृत्तिधरसारङ्गवारिधर सारङ्गराजवरदा-
सारं गदारितरसारं गतात्ममदसारं गतौषधबलम् ।
सारङ्गवत्कुसुमसारं गतं च तव सारङ्गमाङ्घ्रियुगलम् ।
सारङ्गवर्णमपसारं गताब्जमदसारं गदिंस्त्वमव माम् ॥ ३३॥

ग्रीवास्यवाहतनुदेवाण्डजादिदशभावाभिरामचरितम् ।
भावातिभव्यशुभधीवादिराजयतिभूवाग्विलासनिलयम् ।
श्रीवागधीशमुखदेवाभिनम्यहरिसेवार्चनेषु पठता-
मावास एव भवितावाग्भवेतरसुरावासलोकनिकरे ॥ ३४॥

इति श्रीमद्वादिराजपूज्यचरण विरचितं

श्रीदशावतारस्तुतिः संपूर्णम्

दुर्गास्तवः

सन्नद्धसिंहस्कन्धस्थां स्वर्णवर्णां मनोरमाम् ।
पूर्णेन्दुवदनां दुर्गां वर्णयामि गुणार्णवाम् ॥ १॥

किरीटहारग्रैवेयनूपुराङ्गदकङ्कणैः ।
रत्नकाञ्च्या रत्नचित्रकुचकञ्चुकतेजसा ॥ २॥

विराजमाना रुचिराम्बरा किङ्किणिमण्डिता ।
रत्नमेखलया रत्नवासोपरि विभूषिता ॥ ३॥

वीरशृङ्खलया शोभिचारुपादसरोरुहा ।
रत्नचित्राङ्गुलीमुद्रारत्नकुण्डलमण्डिता ॥ ४॥

विचित्रचूडामणिना रत्नोद्यत्तिलकेन च ।
अनर्घ्यनासामणिना शोभिताऽऽस्यसरोरुहा ॥ ५॥

भुजकीर्त्या रत्नचित्रकण्ठसूत्रेण चाङ्किता ।
पद्माक्षिणी सुबिम्बोष्ठी पद्मगर्भादिभिः स्तुता ॥ ६॥

कबरीभारविन्यस्तपुष्पस्तबकविस्तरा ।
कर्णनीलोत्पलरुचा लसद्भ्रूमण्डलत्विषा ॥ ७॥

कुन्तलानां च सन्तत्या शोभमाना शुभप्रदा ।
तनुमध्या विशालोरःस्थला पृथुनितम्बिनी ॥ ८॥

चारुदीर्घभुजा कंबुग्रीवा जङ्घायुगप्रभा ।
असिचर्मगदाशूलधनुर्बाणाङ्कुशादिना ॥ ९॥

वराभयाभ्यां चक्रेण शङ्खेन च लसत्करा ।
दंष्ट्राग्रभीषणास्योत्थहुङ्कारार्दितदानवा ॥ १०॥

भयङ्करी सुरारीणां सुराणामभयङ्करी ।
मुकुन्दकिङ्करी विष्णुभक्तानां मौक्तशङ्करी ॥ ११॥

सुरस्त्रीकिङ्करीभिश्च वृता क्षेमङ्करी च नः ।
आदौ मुखोद्गीर्णनानाऽऽम्नाया सर्गकरी पुनः ॥ १२ ॥

निसर्गमुक्ता भक्तानां त्रिवर्गफलदायिनी ।
निसु(शु)म्भसु(शु)म्भसंहर्त्री महिषासुरमर्दिनी ॥ १३ ॥

तामसानां तमःप्राप्त्यै मिथ्याज्ञानप्रवर्तिका ।
तमोभिमानिनी पायाद्दुर्गा स्वर्गापवर्गदा ॥ १४ ॥

इमं दुर्गास्तवं पुण्यं वादिराजयतीरितम् ।
पठन्विजयते शत्रून्मृत्युं दुर्गाणि चोत्तरेत् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितः

दुर्गास्तवः सम्पूर्णः

धीशुद्धिस्तोत्रम्

चिन्तामणिर्हयग्रीवो वशे यस्य निषेविणः ।
सोऽपि सर्वार्थदो नॄणां किमुतासौ हयाननः ॥ १॥

यं यं चिन्मय सन्मूर्ते धर्मं कुर्मस्तवाज्ञया ।
तं तं घ्नन्त्यसुराः किं तद्धन्ता त्वं तान्न कृन्तसि ॥ २॥

त्वद्दत्तपुण्यवित्तं मे सद्यः पापैरपाहरन् ।
कृद्वा दैत्या न दैत्यारे तद्विक्रान्तेरलं तव ॥ ३॥

स्वक्षेम राम मे कामे रक्षांस्यक्षाण्यचिक्षिपन् ।
तत्क्षाम्यं न हृषीकेशस्याक्षय्यत्रय्यधीशितुः ॥ ४॥

स्वप्नोऽपि सूचको यस्मात्तस्मादस्माकमच्युत ।
अस्वप्नप्रिय न स्वप्नेऽप्यक्षं निक्षिप दुष्कृते ॥ ५॥

क्वाहं नृहय तेंऽर्घ्कशरणः करुणाम्बुधे ।
क्वेदं निस्सारसंसारनीहारावरणं मम ॥ ६॥

अनुत्साहमहोत्साहचरणस्मरणे सताम् ।
शरणे सति जल्पन्तः किमसन्तो हसन्ति नः ॥ ७॥

कस्य कस्य प्रियं ब्रूमः स्तुमः कं कं पदे पदे ।
कस्मै कस्मै दिशामोऽर्थं कस्माद्वाऽस्मत्प्रयोजनम् ॥ ८॥

को वा जीवापरस्त्राता देवाच्छ्रीवासुदेवतः ।
यो वा गा वाति यश्चोर्ध्वं तौ वातौ वामनाश्रितौ ॥ ९॥

मां चेन्मुञ्चति देवोऽसौ गां च मुञ्चति वैदिकीम् ।
सत्यव्रतस्य नासत्यं भक्तस्य न कदाऽपि भीः ॥ १०॥

प्रभो प्रबोध्य बोधाब्धिं प्रबुद्धबुधसाध्य ते ।
कृपाक्षपाकरकरश्चकोरीमिव पातु माम् ॥ ११॥

सेयं श्रीशहयग्रीवदासेनाऽऽचार्यसेविना ।
यतिना वादिराजेन स्तुतिर्धीशुद्धये कृता ॥ १२ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

धीशुद्धिस्तोत्रं सम्पूर्णम्

नरहर्यष्टकम्

यद्धितं तव भक्तानामस्माकं नृहरे हरे ।
तदाशु कार्यं कार्यज्ञ प्रळयार्कायुतप्रभ ॥ १॥

रटत्सटोग्र भ्रुकुटीकठोरकुटिलेक्षण ।
नृपञ्चास्य ज्वलज्ज्वालोज्ज्वलास्यारीन्हरे हर ॥ २॥

उन्नद्धकर्णविन्यास विवृतानन भीषण ।
गतदूषण मे शत्रून् हरे नरहरे हर ॥ ३॥

हरे शिखिशिखोद्गास्वदुरः क्रूरनखोत्कर ।
अरीन् संहर दंष्ट्रोग्रस्फुरज्जिह्व नृसिंह मे ॥ ४॥

जठरस्थजगज्जाल करकोट्युद्यतायुध ।
कटिकल्पतटित्कल्पवसनारीन् हरे हर ॥ ५॥

रक्षोध्यक्षबृहद्वक्षोरूक्षकुक्षिविदारण ।
नरहर्यक्ष मे शत्रुपक्षकक्षं हरे दह ॥ ६॥

विधिमारुतशर्वेन्द्रपूर्वगीर्वाणपुङ्गवैः ।
सदा नतांघ्रिद्वन्द्वारीन् नरसिंह हरे हर ॥ ७॥

भयङ्करोर्वलङ्कार वरहुङ्कारगर्जित ।
हरे नरहरे शत्रून्मम संहर संहर ॥ ८॥

वादिराजयतिप्रोक्तं नरहर्यष्टकं नवम् ।
पठन्नृसिंहकृपया रिपून् संहरति क्षणात् ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

नरहर्यष्टकम् सम्पूर्णम्

नवग्रहस्तोत्रम्

भास्वान् मे भासयेत् तत्त्वं चन्द्रश्चाह्लादकृज्जवेत् ।
मङ्गळो मङ्गळं दद्यात् बुधश्च बुधतां दिशेत् ॥ १॥

गुरुर्मे गुरुतां दद्यात् कविश्च कवितां दिशेत् ।
शनिश्च शं प्रापयतु केतुः केतुं जयेऽर्पयेत् ॥ २॥

राहुर्मे राहयेद्रोगं ग्रहाः सन्तु करग्रहाः ।
नवं नवं ममैश्वर्यं दिशन्त्वेते नवग्रहाः ॥ ३॥

शने दिनमणेः सूनो स्वनेकगुणसन्मणे ।
अरिष्टं हर मेऽभीष्टं कुरु मा कुरु सङ्कटम् ॥ ४॥

हरेरनुग्रहार्थाय शत्रूणां निग्रहाय च ।
वादिराजयतिप्रोक्तं ग्रहस्तोत्रं सदा पठेत् ॥ ५॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

नवग्रहस्तोत्रं सम्पूर्णम्

नैवेद्यप्रकारः

नित्यानन्द चिदाकृते त्रिजगतीचित्रान्नभुक्तेऽनिशं
विष्वग्व्याप्त बृहच्छरीर निरनिष्टावद्यविद्रावण ।
मुक्ताधीश्वर दुर्घतान्नघटनाचातुर्यधुर्य प्रभो
कः कुर्यात्प्रति ते विनाऽञ्जलिपुटं भक्तोऽल्पको वा महान् ॥ १॥

सर्पिःपायसकर्दमामृतनदीनाथेदमाद्यं किल
क्षुद्रक्षीरमपूपशाकविविधान्नद्यं किलेदं तव ।
दुग्धाब्ध्युन्मथनोत्थसद्घनसुधाविश्राणनं योऽकरो-
स्तस्य श्रीश तवान्वहं नम इति प्रब्रूत्वमेवार्हणम् ॥ २॥

भक्त्या नाभजमीदृशं त्वसदृशं त्वां सद्वशं मादृशं
प्रत्यर्प्यादृतया दृशं निजमनस्याद्यादृशं तादृशम् ।
सोऽहं दुर्विषयौघमोहविषमो दोषोत्थरोषो द्विषो
नथेमां सुरयूथनाथ कुरुते गाथाब्धिपाथःपथम् ॥ ३॥

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं सदा ।
पूजावसानसमये पठेत्केशवसन्निधौ ॥ ४॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

नैवेद्यप्रकारः सम्पूर्णः

परमस्तुतिः

मौक्तिकांकुरकल्पदंष्ट्रमुखाम्बुजं प्रलयाम्बुजं
चक्रशङ्खवराभयच्छविमत्करं सुयशस्करम् ।
रत्नराजिविराजिवृत्तशिरोधरं धरणीधरं
पोत्रिरूपिणमच्युतं प्रणतोस्मि तं सुखदस्मितम् ॥ १॥

अङ्कहीननिशेशबिम्बसमाननं निजमाननं
शङ्खमाल्यसुबोधपुस्तकधारिणं मधुवैरिणम् ।
कुंकुमाङ्कितचन्दनोज्जवलकन्धरं श्रुतिमन्दिरं
किङ्करीकृतविश्वमश्वमुखं भजत्सुखदं भजे ॥ २॥

नीलशैलविशालवप्रलसद्भुजान्तरसद्भुजा-
बाल्यमानुषसक्तभूललनाश्रमघ्न जितश्रम ।
मालतीमणिमंजुमाल्य सरोजनेत्र गुरो जने
कोलरूप भवन्तमीश नतोऽस्मि तं सुखदस्मितम् ॥ ३॥

हारशोभिविशालवक्षसमीश्वरं तमनश्वरं
वारिजातसुजातपत्रविलोचनं कृतसेचनम् ।
शारदाम्बुदसन्निभं सकलोन्नतं सुजनैर्नतं
पारवर्जितशौर्यमश्वमुखं भजत्सुखदं भजे ॥ ४॥

जातरूपमयाग्र्यमध्यविभूषणं भवभीषणम
पीतवस्त्रविषक्तसद्रशनोर्जितं मलवर्जितम् ।
आततायिसुरारिसङ्घयभङ्गदं कनकाङ्गदं
ख्यातसूकररूपिणं प्रणतोऽस्मि तं सुखदस्मितम् ॥ ५॥

पद्मरागविरागकिङ्किणिमेखलाञ्चितमेखला
साध्य बुद्धिरियं वरोदरबन्धन स्मरतां धन ।
त्वाद्य चिन्तयदुद्यदर्कसमाम्बरं गतडम्बरं
तद्वराय भवन्तमश्वमुखं भजत्सुखदं भजे ॥ ६॥

मृद्विभेन्द्रकरोपमाङ्गवल्लभं सुरवल्लभं

स्निग्धजानुयुगं मनोहरजङ्घमुद्भूतजङ्घमम् ।
पद्मशोभिपदानखीकृतनागमान्यघनागमा-
वेद्यमद्भुतसूकरं प्रणतोस्मि तं सुखदस्मितम् ॥ ७॥

वर्तुलोरुयुगं मनोरमवृत्तजानुमवृत्तजा
स्तुत्यकोमलपुष्टजङ्घमहीनतल्पमहीनतम् ।
रक्तशारदचारुपद्मलसत्पदं निगमास्पदं
दैत्यवार्धिमहौर्वश्वमुखं भजत्सुखदं भजे ॥ ८॥

वादिराजयतीरिता हयवक्त्रभूधरवक्त्रभू
र्वेदवागिव पावनी परमस्तुतिर्गुणविस्तृतिः ।
सादरं पठतां सतां हरिपादपेशलपादपे
साधुभक्तिलतां स्थिरीकुरुतेतरामवृतेतरा ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

परमस्तुतिः सम्पूर्णा

पाषण्डखण्डनं व्यासस्तोत्रम्

भीष्मेण काम्यकवने धर्मराजं नृपं प्रति ।
सत्यं सत्यमिति श्लोको भुजावुद्धृत्य पीवरौ ॥ १॥

उक्तः किल सभामध्ये कथेयमखिला स्फुटम् ।
शेषधर्माश्चर्यपर्वद्वितीयाध्यायमध्यगा ॥ २॥

अतस्तस्य भुजावेव छेद्यौ यद्यस्ति पौरुषम् ।
व्यासस्तु तां कथां ग्रन्थे निबबन्ध परं सुधीः ॥ ३॥

किं यमः पापिनं हन्यात्किं वा पापस्य साक्षिणः ।
हृता सीता रावणेनेत्युक्ते न हि जटायुषः ॥ ४॥

शिरश्चिच्छेद भगवान्रामो राजीवलोचनः ।
किं तु भार्यापहर्तारं जघान युधिं रावणम् ॥ ५॥

इदं निदर्शनं पश्य माऽविवेके मनः कृथाः ।
उद्धृत्य शेषधर्मस्थवाक्यान्यपि च कानिचित् ॥ ६॥

मन्दानामुपकाराय दर्शयिष्यामि तत्त्वतः ।

॥ युधिष्ठिर उवाच ॥

पितामह महाप्राज्ञ सर्वशास्त्रविशारद
कृष्णे धर्मे च मे भक्तिर्यथा स्याद्धि तथा वद ॥ ७॥

॥ भीष्म उवाच ॥

शृणु पाण्डव वक्ष्यामि हरिभक्तिं सुदुर्लभाम् ॥ ८॥

श्रोतॄणां सर्वपापघ्नीं वदतां च युधिष्ठिर ।
सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ॥ ९॥

वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम् ।
सत्यं वच्मि हितं वच्मि सारं वच्मि पुनःपुनः ॥ १०॥

असारे दग्धसंसारे सारं यद्विष्णुपूजनम् ।
उद्धृत्य स्वभुजौ भीष्मः शशंस किल संसदि ॥ ११॥

एवं च व्यासदेवस्य कोऽपराधो विचारय ।
अतो मध्वमुनेर्वाक्ये भारतज्ञशिरोमणेः ॥ १२॥

उद्धृतं बाहुयुगलं यथा भवति वै तथा ।
भीष्माचार्यकृतस्योग्रशपथस्य समीरितम् ॥ १३॥

यत्र तद्वै व्यासवचः शृणुतेत्येव योजना ।
तत्तत्कृत्यानुवक्ता च शास्त्राचार्योऽखिलस्य च ॥ १४॥

अशेषनिगमोद्धर्ता हर्ता दुस्समयस्य च ।
मनस्सङ्कल्पमात्रेण कुरुपाण्डवसेनयोः ॥ १५॥

कर्ता सत्यवतीपुत्रो विहर्ता मुनिमण्डले ।
राजसूयस्य चाचार्यः सर्पयागस्य च प्रभुः ॥ १६॥

कस्तस्य भुजयोश्छेत्ता किं वा तच्छेदकारणम् ।
भ्रममूला ततस्सर्वा कथाऽऽसीद्व्यासवैरिणाम् ॥ १७॥

रजकद्रोहतो भिक्षोः शूलारोपणवाक्यवत् ।
भ्रामकं तस्य शास्त्रं च यत्रेत्थं समुदीरितम् ॥ १८॥

नारीसङ्गममत्तोऽसौ यस्मान्मामवमन्यते ।
योनिलिङ्गस्वरूपं हि तस्मादस्य भविष्यति ॥ १९॥

इति पाद्मपुराणोक्तभृगुशापस्य साहसम् ।
पश्यन्तु पञ्च शीर्षाणि भुजानां तु चतुष्टयम् ॥ २०॥

द्वौ पादावुदरं वक्षः कटी चोरू च धूर्जटेः ।
विच्छिद्य तत्क्षणादेव पेतुः किल महीतले ॥ २१॥

शिश्नमात्रं तूर्वरितं तच्च योन्यां निवेशितम् ।
अत्र प्रमाणं शैवानां कण्ठेकण्ठेऽवलम्बिनी ॥ २२॥

लिङ्गमालैव या नित्यं करे वामे प्रपूज्यते ।
अतः पाद्मोदितकथा शैवानामपि सम्मता ॥ २३॥

हस्तद्वययवती रम्यजटामण्डलमण्डिता ।
पद्मपादा श्यामवर्णा लसत्कृष्णाजिनोज्ज्वला ॥ २४॥

मन्दस्मिता चन्द्रमुखी बिम्बोष्ठी पङ्कजेक्षणा ।
कुन्दकुड्मलदन्ताभा सान्द्रकुन्तलसङ्कुला ॥ २५॥

कन्दर्पकोटिसदृशी सौन्दर्याम्भुधिमन्दिरा ।
वन्दारूणामभयदा वन्द्यमाना सुरैर्नरैः ॥ २६॥

अद्यापि पूज्यते व्यासप्रतिमा ज्ञानदायिनी ।
चित्रकैर्लिख्यते भिक्तौ मन्त्रशास्त्रेषु वर्ण्यते ॥ २७॥

अहो व्यासभुजच्छेदमाशासानस्य दुर्मतेः ।
स्वदैवसर्वगात्राणां छेदः खेदकरोऽभवत् ॥ २८॥

तद्बुद्धिमिच्छतो मूलच्छेदोऽभूत्तव दुर्जन ।
यद्व्यासाय द्रुह्यतस्ते शिवद्रोहोऽभवद्ध्रुवः ॥ २९॥

विवादपरिहाराय कथेयं ग्रथिताऽखिला ।
यतिना वादिराजेन व्यासकैङ्कर्यकामिना ॥ ३०॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

पाषण्डखण्डनव्यासस्तोत्रम् सम्पूर्णम्

प्रार्थनादशकस्तोत्रम्

रमारमणमध्वादिदेशिक श्रीहृदब्जग ।
हयग्रीव कृपाळो मे प्रार्थनां शृणु सादरम् ॥ १॥

अयोग्यविषये स्वामिन् सर्वथा न मनो भवेत् ।
चाञ्चल्यं मूलतश्छिन्धि दुराशां हर दूरतः ॥ २॥

दुर्बुद्धिं च न मे देहि दुःशास्त्रावर्तने रतिम् ।
हापयस्व च दुर्मानं दुर्गुणं मोचय प्रभो ॥ ३॥

दुःसङ्गं दुष्क्रियां छिन्धि हर लोकाटनात् पदौ ।
न नियोजय चक्षूंषि परदारादिदर्शने ॥ ४॥

दुष्प्रतिग्रह दुःस्पर्शे करौ मा चोदय ध्रुवम् ।
अगम्यागमने गुह्यं घ्राणमाघ्राणनेऽसताम् ॥ ५॥

अपकर्षं तु जिह्वां मे लोकवार्ता दुरन्नतः ।
दुर्वार्ता दुष्टशब्देभ्यो निवर्तय हरे श्रुती ॥ ६॥

भवदिच्छानुगं चेतो योग्यसद्विषयं भवेत् ।
यदृच्छालाभसन्तृप्तं निश्चाञ्चल्यं भवेत् त्वयि ॥ ७॥

सज्ज्ञानं सर्वदा देहि सच्छास्त्रावर्तने रतिम् ।
सत्सङ्गं सत्क्रियां चैव पादौ त्वत्क्षेत्रसर्पणे ॥ ८॥

श्रीमध्वशास्त्रश्रवणे नियुङ्क्ष्व श्रवणे सदा ।
हयास्य चक्षूंषि च मे दर्शने सन्नियोजय ॥ ९॥

करौ त्वदर्चने नित्यं सुखतीर्थस्य लेखने ।
त्वदालापे त्वदुच्छिष्टभोजने कुरु जिह्विकाम् ॥ १०॥

घ्राणं भवतु निर्माल्याघ्राणने नमने शिरः ।
देहि मे तु ज्ञानभक्तिपशुपुत्रधनादिकम् ॥ ११॥

प्रार्थनादशकं चैतत् त्रिकाले यः पठेन्नरः ।
तस्याभीष्टं हयास्योऽसौ दत्वा रक्षति सर्वदा ॥ १२ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

प्रार्थनादशकस्तोत्रं सम्पूर्णम्

भूगोळवर्णनम्

नारायणं नमाम्यग्र्यहारायणशिरोधरम् ।
दूरायनमदूरं च पारायणपरायणम् ॥ १॥

आज्ञाताम्नायशिरसे स्वाज्ञातकमलोरसे ।
स्मरद्दृङ्भीनसरसे तुरङ्गशिरसे नमः ॥ २॥

नमस्तमस्तरणये मुनये शास्त्रयोनये ।
व्यासायाशेषजनयेऽशनये कुनयैषिणाम् ॥ ३॥

श्रीये नयोन्नतधिये ह्रिये गतभिये नमः ।
प्रियेक्षणरयेतापिलये सत्यस्य चेङ्गितम् ॥ ४॥

नमोस्तु भूमये लक्ष्मीजामये याऽस्ति धीमये ।
वराहवदने शास्त्रसदने स्वप्रमोदने ॥ ५॥

शुद्धायानादिसिद्धाय स्वाध्यायोन्नद्धबुद्धये ।
हृद्याय निरवद्याय मध्वाय च नमो नमः ॥ ६॥

मनोज्ञमूर्त्यै भारत्यै मतिमत्यै हरेः पदे ।
कृतरत्यै सदोन्नत्यै महाभूत्यै नमो नमः ॥ ७॥

अरिभ्यः कुत्सितधियां तरिभ्यो भवसागरे ।
गुरुभ्यः सेविनां कल्पतरुभ्यश्च नमो नमः ॥ ८॥

पूर्वखर्परतः प्रत्यक् खर्परान्तं तथोत्तरात् ।
खर्पराद्दक्षिणान्तं च मण्डलाकारतः स्थितम् ॥ ९॥

घनोदकं स्यादिद्वस्तावत्समुद्र इव संश्रुतम् ।
तदन्तर्मण्डलाकारं तमश्च समुदीरितम् ॥ १०॥

द्विस्तावत्पृथिवीत्युक्तं पृथुत्वाच्छ्रुतिमस्तके ।
तदन्तर्मण्डलाकारा भूश्चेयं समुदीरिता ॥ ११॥

पृथिवीसमुद्रपर्यन्तेत्युक्ता या विप्रमण्डले ।
मध्ये सौवर्णगिरिणा मेरुणा सप्तभिः क्रमात् ॥ १२ ॥

द्वीपैस्समुद्रैश्च युता मण्डलाकारतः स्थितैः ।
पञ्चाशत्कोटिविस्तीर्णं मिलित्वैतत्त्रयं किल ॥ १३ ॥

तत्र भूः कोटिसंख्यायां सप्तभिः कोटिभिर्युता ।
ततो द्विगुणितस्यान्धतमसः स्युश्चतुर्दशः ॥ १४ ॥

घनोदकस्य तस्माच्च द्विगुणस्य विचारणे ।
अष्टाविंशत्कोटयः स्युः कोटिसंख्यैवमेव हि ॥ १५ ॥

मेरोर्मध्यप्रदेशात्तु सार्धकोटित्रया मही ।
पूर्वतोऽपरतश्चापि मिलित्वा सप्तकोटियुक् ॥ १६ ॥

एवं घनोदतमसोरपि भागद्वयस्थयोः ।
मेलने तूक्तमानं स्याद्विभागे तु तदर्धकम् ॥ १७ ॥

एवं चैकोनपञ्चाशत्कोटयस्त्रिषु खण्डिताः ।
अवशिष्टैककोटिस्तु विभज्या लक्षसंख्यया ॥ १८ ॥

तच्चतुर्दशलक्षाणि भूमेः स्युस्तमसस्तथा ।
अष्टाविंशल्लक्षता स्याद्घनोदकमपि क्रमात् ॥ १९ ॥

षट्पञ्चाशल्लक्षवत्स्यात्लक्षसंख्यैवमेव हि ।
लक्षाणां नवतेरष्टकस्य चैवं व्यये कृते ॥ २० ॥

सहस्रसंख्ययैव स्याच्छिष्टलक्षद्वयव्ययः ।
अष्टाविंशत्सहस्राणि योजनानि भुवोऽभवन् ॥ २१ ॥

षट्पञ्चाशत्सहस्त्राणि तमसः क्रमशोऽभवन् ।
सहस्राणां द्वादशकं शतं चाभूद्घनोदके ॥ २२ ॥

सहस्राणां शतस्यैवं सषड्कनवतेर्व्यये ।
चत्वार्यत्र सहस्राणि यानि शिष्टानि तानि च ॥ २३ ॥

शतैरेव विभज्यानि तत्पञ्चशतयोजना ।
भूः स्यात्तमश्च तेनाभूत् द्विःपञ्चशतयोजनम् ॥ २४ ॥

घनोदकं चतुर्भिस्तद्युक्तं पञ्चशतैरभूत् ।
एवं चार्धसहस्रस्य त्रिसहस्र्याः व्यये कृते ॥ २५ ॥

या चात्रोर्वरिता पञ्चशती तत्रापि सप्ततिः ।
योजनानि पृथिव्याः स्युस्तमसस्तु शतं तथा ॥ २६ ॥

चत्वारिंशद्योजनानि घनोदकमतः परम् ।
द्विशतेन तथाऽशीत्या योजनानामभून्महत् ॥ २७ ॥

एवं नवत्या संयुक्ते गते शतचतुष्टये ।
योजनानां यद्दशकमवशिष्टं ततोऽपि च ॥ २८ ॥

एकं पृथिव्यास्तमसो द्वयमन्त्ये चतुष्टयम् ।
एवं सप्तव्यये जाते यदत्रोर्वरितं त्रिकम् ॥ २९ ॥

तस्य च द्वादशक्रोशान् कृत्वैव विभजेद्बुधः ।
सार्धक्रोशः पृथिव्याः स्यात्तमसोऽपि त्रयं स्मृतम् ॥ ३० ॥

क्रोशानां तद्बहिःस्थे स्यात्क्रोशषट्कं घनोदके ।
एवं च क्रोशदशके क्रोशार्धे च व्ययीकृते ॥ ३१ ॥

सार्धक्रोशोऽत्र शिष्टः स्याद्दण्डैस्तं चिभजेद्बुधः ।
हस्तैश्चतुर्भिर्दण्डः स्याद्दण्डानां तु सहस्रकम् ॥ ३२ ॥

क्रोश इत्युच्यते सद्भिस्तच्चतुष्कं तु योजनम् ।
एवं च सार्धक्रोशस्य दण्डानां स्यात्सहस्रकम् ॥ ३३ ॥

तथा पञ्चशतं चैव तांश्चापि विभजेद्बुधः ।
दण्डानां द्विशतं चैव चतुर्दशकमेव च ॥ ३४ ॥

भूमेः प्रकल्पयेद्द्विद्वांस्तमसश्च चतुःशतम् ।
अष्टाविंशच्च दण्डाः स्युः घनोदकमहाम्बुधेः ॥ ३५ ॥

शतानामष्टकं पञ्चाशच्च षड्दण्डसंयुतम् ।

एवं दण्डसहस्रस्य तच्चतुःशतकस्य च ॥ ३६॥

अष्टोत्तरायाः नवतेश्चोक्तन्यायाद्व्ययये कृते ।
दण्डद्वयस्य शिष्टस्य हस्ताष्टकमुदीरितम् ॥ ३७॥

तत्र भूमेरेकहस्तस्तमसो दोर्द्वयं स्मृतम् ।
घनोदकस्य हस्तानां चतुष्टयमुदीरितम् ॥ ३८॥

हस्तानां सप्तके त्वेवं गते योऽत्रावशिष्यते ।
एको हस्तस्तस्य चापि चतुर्विंशांगुलं स्मृतम् ॥ ३९॥

तत्र भूमेरंगुलानां त्रयं स्यात्तमसस्तु षट् ।
घनोदस्य द्वादश स्युरेवं चांगुलयो गताः ॥ ४०॥

एकविंशतिसंख्याताः पुनरुर्वरितं त्रिकम् ।
नवव्रीहिप्रमाणं स्यात्तत्र भूव्रीहिसम्मिता ॥ ४१॥

व्रीहिद्वयेतं तु तमो घनोदं च विचारणे ।
चतुर्व्रीहिप्रमाणेन सहितं स्याद्बहिःस्थितम् ॥ ४२॥

व्रीहीणां सप्तके स्वेवं गते सति च यत्पुनः ।
व्रीहिद्वयं च शिष्टं स्यात्तच्चापि विभजेद्बुधः ॥ ४३॥

एको व्रीहिस्सर्षपाणां सप्तकोपमितः किल ।
एवं च व्रीहियुग्मस्य सर्षपाः स्युश्चतुर्दश ॥ ४४॥

तत्र भूमेस्सर्षपयोर्द्वयं योज्यं तमस्यपि ।
चतुष्टयं सर्षपाणां घनोदेत्वष्टकं स्मृतम् ॥ ४५॥

इयम भूगोळमर्यादा श्रुतिमूला यतोऽखिला ।
अतोऽस्या अविरोधेन सर्वत्रार्थं वदेद्गिराम् ॥ ४६॥

एवं च यत्पुराणोक्तं सप्तांशशतपञ्चकम् ।
भुवो मानाय हरिणा तत्पञ्चशतयोजनम् ॥ ४७॥

तस्यैव सप्तमो योंऽशस्त्वेकसप्ततिरूपकः ।
अस्मदुक्ताधिकांशेन युतस्स च बलादभूत् ॥ ४८॥

यतः कृते युगे पुंसां धान्यादीनां च सर्वशः ।
स्थूलता तेन तत्काले सर्षपैस्सप्तभिर्युतः ॥ ४९ ॥

व्रीहिश्च स्थूल एव स्यात् तैस्त्रिभिः कथितांगुली ।
युगान्तरस्थांगुलिभिरीषत्स्थूलं भवेद्ध्रुवम् ॥ ५० ॥

तन्मूलहस्तदण्डादेः स्थौल्यात्तत्कालकल्पितम् ।
योजनं च भवेत्स्थूलं तद्युगादौ कृता मही ॥ ५१ ॥

तैरेव योजनैः सृष्टा कल्पादौ किल विष्णुना ।
भूगोलविस्तृतिर्ग्राह्या तत्कार्तयुगयोजनैः ॥ ५२ ॥

द्विस्तावदितिवेदोक्तवर्त्मनैव विचक्षणैः ।
एकां कोटिं विभज्यैवं भूम्यादित्रितये न्यसेत् ॥ ५३ ॥

एतत्सर्वं हृदिन्यस्य भूगोळं पूर्वसूरयः ।
पञ्चाशत्कोटिविस्तीर्णं प्राहुस्तच्चातिदुर्गमम् ॥ ५४ ॥

एवं च पृथिवी सेयं ससप्तद्वीपसागरा ।
लक्षयोजनविस्तारमध्यस्थद्वीपतः क्रमात् ॥ ५५ ॥

विश्वतः परिवार्यैनं स्थितैः सप्तभिरब्धिभिः ।
द्वीपैश्चान्यैः क्रमेणैव द्विगुणैः पूर्वपूर्वतः ॥ ५६ ॥

युक्ताऽभूत्स्वर्णभूम्यन्तः कोटिपञ्चकयोजना ।
लक्षैश्च सप्तभिर्युक्ता नित्यमासीद्विचारणे ॥ ५७ ॥

हैमी भूमिश्च परितः संस्थिताऽन्तिमसागरम् ।
वज्रलेपोज्ज्वलद्बाह्यभागा भास्वन्निभप्रभा ॥ ५८ ॥

अन्त्याध्यर्धस्थलमिति प्रोक्ता सा च विविच्यते ।
द्विपञ्चाशत्सहस्रा च कोटिमूलकृतैव हि ॥ ५९ ॥

लोकालोककृतेर्मानसंख्या सङ्कीर्तिता स्फुटम् ।
अतः षड्कोटयो लक्षसप्तकं लक्षमेव च ॥ ६० ॥

सिद्धं ब्रह्मभुवोऽन्यस्य भूमिभागस्य केवलम् ।
एवं च सप्तकोटीनां प्रागुर्वरितकोटितः ॥ ६१॥

लब्धानां दशलक्षाणां चतुर्लक्ष्याश्च पूर्तये ।
एका कोटिश्च लक्षाणां षड्कमेव ह्यपेक्षितम् ॥ ६२॥

अतोऽन्तिमसमुद्रस्य परितो मण्डलाकृतेः ।
भागद्वये मिलित्वाऽष्टाविंशल्लक्षयुतं तु यत् ॥ ६३॥

कोटियोजनमानं स्यात्ततोऽप्यर्धं तु यद्भवेत् ।
चतुष्पष्ट्याख्यमेतच्च कयाऽप्यधिकसंख्यया ॥ ६४॥

चत्वारिंशल्लक्षयुक्तलक्षद्वितयरूपया ।
युतमध्यर्धशब्दोक्तं शास्त्रसंख्याप्रपूर्वकम् ॥ ६५॥

तत्रोपसर्जनीभूतवज्रलेपेन सङ्गता ।
अधिशब्दोक्तसंख्या स्याद्भागाः प्रागुदिताश्च ये ॥ ६६॥

विशेषणेऽस्मिन्युज्येरन् शब्दार्थौ यत्समौ मतौ ।
अर्धशब्दोदिता शंख्या विशेष्यपदबोधिता ॥ ६७॥

योजनानां चतुष्षष्टिलक्षरूपोक्तवर्त्मना ।
विशेष्यस्वर्णभूम्यैव युक्ता स्यान्न ततोऽधिका ॥ ६८॥

अतोऽत्राध्यर्धशब्दस्याप्येवमर्थो भवेद्बलात् ।
अध्यर्धशब्दस्यार्थः स्यादित्थमत्र विचारणे ॥ ६९॥

पञ्चाशत्कोटिसंख्याया न चेद्भङ्गो भवेदिह ।
अर्धाधिकं पूर्वलक्षप्रमाणमिति चोपरि ॥ ७०॥

अध्यर्धशब्दस्यार्थः स्याद्यद्वाग्योग्यार्थवादिनी ।
चतुष्षष्टिद्वयमिताद्यदन्त्यद्वीपतोऽधिकम् ॥ ७१॥

अर्धं तद्द्वीपमानं च स्वर्णभूमेरुदीर्यते ।
ह्युत्तरा लक्षनवतिः कोटिश्चैका तदा भवेत् ॥ ७२॥

कोट्यष्टकेन सहिता स्यादेवं सति भूरियम् ।

तमः षोडशकोटिः स्याद्द्वात्रिंशत्कोटिसंयुतम् ॥ ७३ ॥

घनोदकं चैवमासन् पञ्चाशत्कोटितोऽधिकाः ।
षड्कोटयः कुतस्ताः स्युस्तद्वाक्यं नैतदर्थकम् ॥ ७४ ॥

किन्तूक्त एव सम्पूर्णमतेरर्थो मतोऽञ्जसा ।
मृदि व्रीह्यर्थसिद्धार्थप्रमाणं न स्थिरीभवेत् ॥ ७५ ॥

इति मत्वा वज्रलेपे निर्ममेऽतिद्रढिम्नि तत् ।
ग्रन्थबाहुल्यभीत्येदं स्पष्टं नाचष्ट सर्ववित् ॥ ७६ ॥

अधिकार्थोपसर्गोक्तया संज्ञयाऽऽज्ञापयत्प्रभुः ।
स्वसेवकजनख्यात्यै नित्यं मम हृदम्बुजे ॥ ७७ ॥

कृतधामा मध्वनामा स्पष्टयामास तुष्टधीः ।
लक्षयोजनमानेन घनीभूता तु भूरियम् ॥ ७८ ॥

अन्धन्तमस्तु भूमानादप्यधोऽस्ति घनोदके ।
निमज्जितं तु परितो यदधोगतिरीर्यते ॥ ७९ ॥

नरकादवरोहस्तु तस्य स्यात्कथमन्यथा ।
रोहावरोहौ नरकाद्यतः सूत्रकृतोदितौ ॥ ८० ॥

ऊर्ध्वं लोकालोकगिरिरप्यस्त्यभ्रङ्कषं हि तत् ।
शिलीभूततमोरूपं हिमानीव शिलात्मिका ॥ ८१ ॥

न चेद्द्वारं कुतश्चक्रे चक्रेण यदुपुङ्गवः ।
अनादिकालतः प्राप्ताः कल्याद्यास्तत्र दानवाः ॥ ८२ ॥

असंख्याताः किलाश्नन्ति यातनास्तीव्रवेदनाः ।
लयेऽपि मुक्तिवदिदं विष्वक्तिष्ठत्यनश्वरम् ॥ ८३ ॥

तद्गा जीवा एव तदा विशन्ति जठरं हरेः ।
तत्रापि दुःखरूपत्वादक्षिकुक्षिशिरोव्यथाः ॥ ८४ ॥

आधिव्याधींश्च बहुशो भुञ्जते स्वशरीरगान् ।
हर्याज्ञया सृष्टिकाले पतन्त्यत्र किलाखिलाः ॥ ८५ ॥

अग्निशस्त्रशिलाक्षेयरूक्षपक्षिकृता व्यथाः ।
विण्मूत्रपूयकलिलतमःकूपेष्वनेकधा ॥ ८६॥

नानाविधा यातनाश्च पुनर्भोक्तुं हि पूर्ववत् ।
यद्यप्यन्धे तमस्यस्मिन्पतिताः पापिनो जनाः ॥ ८७॥

नित्यदुःखात्मका मिथ्याज्ञानमात्रस्वरूपिणः ।
अच्छेद्याभेद्यदेहत्वात्तथाऽप्यस्त्रादिपातनैः ॥ ८८॥

वज्रकल्पजलूकादिव(र)दनैः पावकोष्मणा ।
शिलापातैः पूयमूत्रमलदुर्गन्धतोऽपि च ॥ ८९॥

रुदतां क्रूरशब्दैश्च तिक्तात्युष्णरसादिना ।
वक्त्रनेत्रश्रोत्रनासागात्रेषु च पुनःपुनः ॥ ९०॥

व्यक्तीभवन्ति नित्यानि दुःखान्येव क्षणेक्षणे ।
मुक्तानां मौक्तविषयैर्व्यक्तानेकप्रमोदवत् ॥ ९१॥

पञ्चकष्टमित्याहुर्यत्पञ्चेन्द्रियदुःखदम् ।
रुदतां क्रूरशब्दैश्च क्रूरशस्त्रादिदर्शनैः ॥ ९२॥

क्रूरगन्धैः क्रूररसैः क्रूरास्त्रस्पर्शनैरपि ।
भूमेरन्तस्सप्तलोकाः सन्ति भूगर्तवत्क्रमात् ॥ ९३॥

अतळं वितळं चैव सुतळं च तळातळम् ।
महातळं पञ्चमं स्याद्रसातळमतः परम् ॥ ९४॥

पाताळं सप्तमं ते चायुतयोजनतोऽखिलाः ।
उच्छ्रिता विस्तृताश्चैव यथायोगं भुवोऽन्तरे ॥ ९५॥

एवं सप्ततिसाहस्रयोजनेषु गतेष्वधः ।
भूरेव बहुसाहस्त्रयोजनाऽऽस्ते शिलामयी ॥ ९६॥

ऊर्ध्वं शोडशसाहस्रे गते मेरोर्निखा(या)तनात् ।
लोकसन्धिषु पट्स्वेवं सहस्रार्धस्य संख्यया ॥ ९७॥

त्रिसहस्र्यां गतायां च पुनरेकादशैव तु ।
योजनानां सहस्राणि स्युरधोभागविस्तृतेः ॥ ९८॥

शेषः पाताळलोकेऽस्मिन्सेवितः सर्वपन्नगैः ।
तिष्टत्यमररूपेण घनोदाख्ये महार्णवे ॥ ९९॥

पुच्छेन वायुकूर्मस्य पृष्ठमालम्ब्य शक्तिमान् ।
उन्नम्य स्वफणामेकां दिग्गजैः सह सर्वतः ॥ १००॥

जलोपरि महीमेतां यथाम्बुनि न मज्जति ।
तथा धारयति श्रीमान्सर्वलोकधुरन्धरः ॥ १०१॥

सङ्कर्षणाख्यहरिणा हृदिस्थेन समेधितः ।
नवाधिकायां नवतौ योजनानां सहस्रके ॥ १०२॥

भुवोऽधस्ताद्वामभागे बहुयोजनविस्तृतः ।
महान् गर्तस्तत्समीपे पुरी संयमनी किल ॥ १०३॥

तत्रोग्ररूपी भगवान् यमस्तिष्ठति सर्वदा ।
अतिक्रूरा यमभटास्तत्र सन्ति सहस्रशः ॥ १०४॥

नदी वैतरणी तत्र पापिनां भयकारिणी ।
तस्योपान्ते तु नरका रौरवाद्या भयङ्कराः ॥ १०५॥

पापिनां शिक्षणकृते कृताः सन्ति सहस्रशः ।
अष्टदिक्पालपंक्तौ तु दक्षिणस्थां दिशि क्रमात् ॥ १०६॥

यमस्य नगरी त्वन्या स्वर्गेऽप्यस्ति सुखप्रदा ।
भुवोऽधस्ताद्धनोदं तु चतुर्विंशतिकोटिभिः ॥ १०७॥

एकोनशतलक्षैश्च योजनैः सम्मितं किल ।
ततोऽधस्तात्खर्परं तु शतकोटिप्रविस्तरम् ॥ १०८॥

तच्च बाह्यावृतिजले हरेरद्भुतकर्मणः ।
महाकूर्मतनोः पृष्ठे तिष्ठत्यणुक(तृ)णोपमम् ॥ १०९॥

भूम्या सहैव सत्यान्ता लोकाः सप्त तथोपरि ।

तत्रान्तरिक्षं लक्षेण योजनानां किलोच्छ्रितम् ॥ ११०॥

अर्धकोट्युच्छ्रितः स्वर्गो विमानावळिसंकुलः ।
कोटियोजनविस्तारौ लोकावेतावुभौ किल ॥ १११॥

तत ऊर्ध्वं महर्लोको योजनानां समुच्छ्रितः ।
लक्षाणां पञ्चसप्तत्या सिद्धिर्षिगणसंकुलः ॥

(तस्मादूर्ध्वं महर्लोकः पञ्चाशल्लक्षयोजनैः ।
स पञ्चविंशल्लक्षैश्चाप्युच्छ्रितः किल वर्तते ।) ॥ ११२॥

तस्मादूर्ध्वं जनो लोकः सार्धद्वादशलक्षया ।
कोट्योच्छ्रितो योजनानां तपोलोकस्ततः परम् ॥ ११३॥

योजनानामेककोट्या लक्षाणामष्टयुक्तया ।
षष्ट्या सप्ततिसाहस्र्या पञ्चसाहस्रयुक्तया ॥ ११४॥

उच्छ्रितः किल सिद्धिर्षिसंकुलः सर्वसौख्यदः ।
नानारत्नौघरचिता लोका एते त्रयः किल ॥ ११५॥

एशां त्रयाणामपि च विस्तारास्त्वेकधैव हि ।
त्रिभागी कृतपञ्चाशत्कोटियोजनमानतः ॥ ११६॥

तच्च शोडशकोटिभिस्सषट्कैः षष्टिलक्षकैः ।
सषट्कषष्टिसाहस्र्या षट्शतैश्चैव योजनैः ॥ ११७॥

पुनश्च षष्ट्या षड्भिश्च कलेत क्रोशयुग्मतः ।
एकैकं विस्तृतं ज्ञेयं लोकानां त्रितयं बुधैः ॥ ११८॥

मिळित्वैषां तु लोकानां यत्कोटीनां चतुष्टयम् ।
लक्षाणि षट्सहस्राणां पञ्चविंशतिरेव च ॥ ११९॥

एतावत्या योजनानां संख्यया पुनरुच्छ्रितः ।
स्याद्ब्रह्मणः सत्यलोकः सर्वकामधुरन्धरः ॥ १२०॥

कोटीनामष्टकाल्लक्षद्विषट्कात्तदुपर्यपि ।
पञ्चाशद्भिः सहस्रैश्चाप्युच्छ्रितं तद्विधेः पदम् ॥ १२१॥

विस्तारस्तस्य चाप्युक्तलोकत्रयवदेव हि ।
कन्दवद्विस्तृतं मूले मध्ये क्षामं च नाळवत् ॥ १२२॥

चतुर्धा पद्मदलवदन्ते त्वत्यन्तविस्तृतम् ।
इदं लोकात्मकं पद्मं घनोदाम्बुजवद्बभौ ॥ १२३॥

सत्यलोकप्रमाणात्तु द्विगुणिकृतमानवान् ।
विष्णोर्लोकस्तु विज्ञेयो यं वैकुण्ठं विदुर्बुधाः ॥ १२४॥

कोटीनां षोडशैः पञ्चविंशल्लक्षयुतैस्स च ।
भूलोकादुच्छ्रितो ज्ञेयो विस्तृतिश्च विधेः पदात् ॥ १२५॥

द्विगुणा तस्य विज्ञेया स च सर्गलयोज्झितः ।
आचाण्डखर्परादा च वैकुण्ठनिलयाद्धरेः ॥ १२६॥

कोटीनामष्टकं पञ्चलक्षेता लक्षसप्ततिः ॥ १२७॥

मध्यदेशप्रमाणं स्यान्मुक्ताः संसारसागरात् ।
विमानाबलिभिर्यत्र सञ्चरन्ति ततस्ततः ॥ १२८॥

मेरोर्नाभेरूर्ध्वमेवं पञ्चविंशतिकोटयः ।
आचाण्डखर्परात्प्रोक्ता लोकाश्चैते तदन्तरा ॥ १२९॥

ऊर्ध्वखर्परपर्यन्तं तथाऽधः परितोऽपि च ।
प्रतीच्युदीचीप्राचीषु दक्षिणस्यां च सङ्ख्यया ॥ १३०॥

पञ्चविंशत्कोटयः स्युरा मेरोरा च कर्परात् ।
मेरोर्मूलान्मध्यदेशमारभ्य गणने त्विदम् ॥ १३१॥

मिलित्वा गणनायां तु पञ्चाशत्कोटयो मताः ।
अण्डं त्वधस्तादूर्ध्वं च विष्वक्च किल वर्तुलम् ॥ १३२॥

सौवर्णं योजनैस्तु स्याच्छतकोटिप्रविस्तरम् ।
उदीच्यां दिशि विष्णोस्तु यादनन्तासनाभिधम् ॥ १३३॥

घनोदकान्ते श्रीरूपं धाम मुक्तजनास्पदम् ।

लक्षयोजनतोऽप्यूर्ध्वं तद्विद्वद्भिरुदाहृतम् ॥ १३४ ॥

तथा श्वेतद्वीपसंज्ञं धाम क्षीराम्बुधौ हरेः ।
तच्चोच्छ्रितं भूप्रदेशात् पञ्चाशल्लक्षयोजनैः ॥ १३५ ॥

इमानि त्रीणि धामानि महालक्ष्म्यात्मकानि यत् ।
अनन्तानन्तमुक्तौघैः पूर्णान्यपि पुनःपुनः ॥ १३६ ॥

अवकाशप्रदात्येव न पूर्यन्ते कदाचन ।
सभा भयकृता विश्वकर्मणा निर्मिता च या ॥ १३७ ॥

न पूर्यते किल जनैः किमु वाच्या हरेः पुरी ।
मुनेरुदरमप्यब्धेरवकाशं ददौ किल ॥ १३८ ॥

शक्त्यात्मिकायाः श्रीदेव्याः पुराणीमानि किं पुनः ॥ १३९ ॥

मुक्ताश्च विष्णोरुदरं प्रविश्य प्रलये सति ।
आनन्दमात्रदेहत्वात्तत्राप्यानन्दभोगिनः ॥ १४० ॥

सृष्टिकाले पुनर्विष्णोर्लोकेष्वेषु समासते ।
गायन्तस्तं नमन्तश्च पश्यन्तश्च पदेपदे ॥ १४१ ॥

नानाभोगांश्च भुञ्जाना रमन्ते किल सन्ततम् ।
अयोध्याख्या मुक्तमात्रगम्या याऽन्तःपुरी हरेः ॥ १४२ ॥

वैकुण्ठसप्तप्राकाराभ्यन्तरे सर्वतो दिशम् ।
भासयन्ती चित्ररत्नगोपुरप्रभयाऽनिशम् ॥ १४३ ॥

परमव्योमसंज्ञाऽऽस्ते विरजाख्या महानदी ।
तां पुरीं परितः पुण्या मज्जतां लिङ्गभङ्गदा ॥ १४४ ॥

परिघेव पुरस्याऽऽस्ते नामुक्तस्तं तरेत्किल ।
सप्तमद्वारपर्यन्तं प्रधानं चास्ति बन्धकम् ॥ १४५ ॥

तदन्तः शक्तिशून्यत्वात्तन्नास्तीति निगद्यते ।
अतः प्रधानपरमव्योम्नोरभ्यन्तरे त्विति ॥ १४६ ॥

पुराणानि जगुः पुण्यां विरजाख्यां महानदीम् ।
मुक्तिकाले योग्यजनैस्सह तत्र निमज्जति ॥ १४७॥

ब्रह्मा लिङ्गशरीरस्य भङ्गे तत्र कृते सति ।
निर्मलस्वस्वरूपैअः स्वैः सहान्तःपुरगो भवेत् ॥ १४८॥

मुक्तेः प्राक्सप्तमद्वारपर्यन्त सोऽपि गच्छति ।
न ततोऽन्तर्विशेत्तां तु कोऽन्तरन्यो विशेत्पुरीम् ॥ १४९॥

अबग्नीरनभोऽहंकृन्महत्तत्वगुणत्रयैः ।
बहिरण्डादावरणैः शतकोटिप्रविस्तरात् ॥ १५०॥

क्रमाद्दशोत्तरैर्युक्तमण्डाख्यावरणं महत् ।
द्विसप्तलोकास्तस्यान्तरिदं विश्वं महाद्भुतम् ॥ १५१॥

यस्यैकरोमकूपान्तः पूर्त्यै नालं महात्मनः ।
कस्तस्य सदृशो देवो देवेषु स्याद्विचारय ॥ १५२॥

सुवर्णात्मा मेरुरयं लक्षयोजनमुच्छ्रितः ।
परितो नवभिः खण्डैर्मण्डितः सिद्धसेवितः ॥ १५३॥

प्रमाणगणनायां तु मध्यमेनं विदुर्बुधाः ।
स्थले क्षामः क्रमेणेषदीषद्विस्तृतमूर्तिमान् ॥ १५४॥

अन्ते विस्तरवान्हैमो गिरिरुन्मत्तपुष्पवत् ।
अतः शोडशसाहस्रयोजनो मूलतः स्मृतः ॥ १५५॥

तावत्या संख्ययैवान्तर्भूमेरपि स मूलतः ।
प्रविष्टः सिद्धयोगीन्द्रैर्मध्येमध्ये कृतालयः ॥ १५६॥

द्वात्रिंशद्भिः सहस्रैस्तु योजनैर्मूर्ध्नि विस्तृतः ।
मण्डलाकारतो मूर्ध्नि मूले च त्रिगुणः स्मृतः ॥ १५७॥

एवं च साष्टसाहस्रचत्वारिंशत्सहस्रतः ।
योजनानां स मूले स्यान्मण्डलाकारवान्गिरिः ॥ १५८॥

षडुत्तरनवत्या तु सहस्राणां स मूर्धनि ।

मण्डलाकारवान्प्रोक्तः सौवर्णाद्रिः सुरप्रियः ॥ १५९ ॥

तन्मध्ये नामतः शातकौम्भी ब्रह्मपुरी किल ।
विचित्ररत्नखचितमन्दिरैरुपशोभिता ॥ १६० ॥

मानतो दशसाहस्र योजना राजतेतराम् ।
तत्र गन्धर्वपतयः सिद्धविद्याधराधिपाः ॥ १६१ ॥

वसिष्ठाद्याश्च मुनयो देवाश्चेन्द्रपुरोगमाः ।
उपासते रत्नचित्रसिंहासनगतं विधिम् ॥ १६२ ॥

अष्टदिक्ष्वष्टदिक्पालपुराणि च यथाक्रमम् ।
सन्ति तेषामेष मेरुस्सौवर्णस्तम्भवद्बभौ ॥ १६३ ॥

विधेः सन्ध्यावन्दनार्थं तत्र गङ्गानदी सदा ।
निपतन्ति ब्रह्मसभाप्राङ्गणे सेव्यतेऽखिलैः ॥ १६४ ॥

जगतां पावनार्थाय सा चतुर्दक्षु शोभना ।
सुधेन्दुधवला पद्मसम्भवस्याऽऽज्ञया क्रमात् ॥ १६५ ॥

प्रवहन्ती चतूरूपैरद्यापि परिदृश्यते ।
सीता पूर्वाब्धिमभ्येति तथेमं दक्षिणार्णवम् ॥ १६६ ॥

अभ्येत्यळकनन्दाख्या विख्याता लोकपावनी ।
चक्षुर्नाम्नी प्रत्यगब्धिं भद्रा चोत्तरसागरम् ॥ १६७ ॥

सेवमानान् दिशिदिशि पावयन्ती पुनःपुनः ।
भगीरथेन चानीता गङ्गा रूपान्तरेण सा ॥ १६८ ॥

स्वस्थमन्दाकिनीरूपादेव नित्यं हिमालये ।
निपतन्ती पुनश्चात्र शिवेन शिरसा धृता ॥ १६९ ॥

अग्रे भगीरथं यान्तमनुयान्ती पुरातनीम् ।
देवप्रयोगे स्वामेव मूर्तिमभ्येत्य कापिले ॥ १७० ॥

पुण्याश्रमे पूर्वदग्धानपुनात्सगरात्मजान् ।
इळावृताख्यखण्डस्तु परितो मेरुनाभितः ॥ १७१ ॥

पूर्वादिदिक्षु तद्भागैर्योजनानां पृथक्पृथक् ।
सहस्राष्टकसंख्यातैर्मूलाधारैश्च तद्बहिः ॥ १७२॥

पर्वतैश्च चतुर्दक्षु दशसाहस्रयोजनैः ।
अतिक्रान्ते मध्यदेशे पुनरुर्वरिता तु या ॥ १७३॥

पञ्चयोजनसाहस्रमिता भूः सर्वतोऽपि च ।
कीलाद्रीणां चतुर्दिक्षु पुनर्नवसहस्रवान् ॥ १७४॥

वर्षेऽस्मिन् केवला नार्यः सञ्चरन्ति दिवानिशम् ।
भवानीशापतस्तत्र पुमान्नभ्येति कश्चन ॥ १७५॥

यद्यायाति स च स्त्री स्याद्यथेळाख्यो मनोस्सुतः ।
अर्बुधं च सहस्रं च तासां संख्या किलोदिता ॥ १७६॥

ताभिस्सहितया गौर्या सह गौरीपतिस्सदा ।
चतुर्मूर्तेर्भगवतः तनुं सङ्कर्षणाभिदाम् ॥ १७७॥

उपास्ते किल योगीन्द्रहृदयाम्बुजभास्करम् ।
चतुर्दिक्ष्वस्य मर्यादा पर्वतास्सन्ति विस्तृताः ॥ १७८॥

गन्धमादनसंज्ञस्तु योजनद्विसहस्रतः ।
विस्तारवाना निषधादा नीलाच्च समुच्छ्रितः ॥ १७९॥

इळावृतात्पूर्वभागे मर्यादापर्वतः स्मृतः ।
दक्षिणस्यां तु निषधः तावद्विस्तारवान्गिरिः ॥ १८०॥

अस्ति पूर्वापरक्षारसिन्धुपर्यन्तमायतः ।
इळावृतात्प्रतीच्यां तु माल्यवान्नाम पर्वतः ॥ १८१॥

आ नीलादा च निषदाद्गन्धमादनवत् स्थितः ।
इळावृतादुत्तरस्यां दिशि नीलाभिधो गिरिः ॥ १८२॥

निषधायामविस्तारो वर्तते सिद्धसेवितः ।
भद्राश्वाख्यो महाखण्डः प्राच्यां दिश्येक एव तु ॥ १८३॥

आ पूर्वाब्धेर्नापरोऽस्ति हयग्रीवोऽत्र पूज्यते ।
खण्डाधिपतिना भद्रश्रवसा धर्मसूनुना ॥ १८४ ॥

तत्पुरुषजनैरेषवर्षः सर्वत्र पूरितः ।
मर्यादाद्रेः प्रमाणेन सहायमपि मानतः ॥ १८५ ॥

सप्तविंशत्सहस्र्या तु योजनानामुदीरितः ।
पूर्वतो जठराख्योऽस्य सीमा पर्वत ईरितः ॥ १८६ ॥

तथैव देवकूटाख्यो गिरिः पश्चादुदीरितः ।
तौ चाष्टादशसाहस्रयोजनानां प्रमाणतः ॥ १८७ ॥

आयामवन्तावुदित्तौ मध्ये निषधनीलयोः ।
द्वाभ्यां द्वाभ्यां योजनानां सहस्रभ्यां प्रविस्तृतौ ॥ १८८ ॥

एकस्मिन्नपि वर्षेऽस्मिन् द्वौ गिरी निर्मतौ क्रमात् ।
चतुर्दक्षु च साम्याय प्रतीच्यां चैवमेव हि ॥ १८९ ॥

गन्धमादनमानेन सह पूर्वाचलान्तरे ।
वर्षोऽयं नवसाहस्रसम्मितोऽपि भवेत्किल ॥ १९० ॥

न चेन्नवानां वर्षाणामपि च ग्रन्थ एव तु ।
वीप्सा नवनवेत्युक्ता न स्यात्तेनेत्थमूह्यताम् ॥ १९१ ॥

अत एकोऽपि वर्षोऽयं त्रेधा स्यात्खण्डितोऽद्रिभिः ।
सर्वभागेऽपि साम्याय नवत्वं च न हन्यते ॥ १९२ ॥

एवं पश्चिमतोऽप्यूह्यं द्वीपालंकृतये बुधैः ।
हरिवर्षो दक्षिणस्यां निषधाख्यमहागिरेः ॥ १९३ ॥

नवयोजनसाहस्रविस्तृतः किल वर्तते ।
नृसिंहरूपी भगवान् प्रह्लादेन महात्मना ॥ १९४ ॥

अद्यापि पूज्यते नित्यं सह तद्वर्षपूरुषैः ।
ततस्तु हेमकूटाख्यस्सीमा गिरिरुदाहृतः ॥ १९५ ॥

विस्तारः पूर्वगिरिवदायामस्तु दशोन्नतः ।

ततः किम्पुरुषाख्यस्तु खण्डो नवसहस्रकः ॥ १९६॥

योजनानां विस्तृतोऽस्ति तस्यापि हिमवान्गिरिः ।
मर्यादापर्वतः प्रोक्तो विस्तारोऽस्यापि पूर्ववत् ॥ १९७॥

आयामोऽस्यापि पूर्वाद्रेर्दशोनः परिकीर्तितः ।
सिन्धोर्मण्डलरूपत्वात्क्रमादूनत्वमेतयोः ॥ १९८॥

अस्मिन्किम्पुरुषे खण्डे रामं सीतापतिं प्रभुम् ।
सह तद्वर्षपुरुषैरुपास्ते हनुमान्किल ॥ १९९॥

ततस्तु भारतो वर्षः पूर्ववर्षप्रमाणवान् ।
आ दक्षिणार्णवात्सोऽपि नराणां पुण्यदः स्मृतः ॥ २००॥

अत्रापि हिमवच्छृङ्गे पुण्ये बदरिकाश्रमे ।
नरेण सहितो नारायणः सिद्धर्षिसेवितः ॥ २०१॥

नारदेनार्च्यते नित्यं सह सप्तर्षिपुरुषैः ।
व्यासरूपी च भगवानत्रैव किल पूज्यते ॥ २०२॥

वायोस्तृतीयरूपेण मध्वेन मुनिभिस्सह ।
मर्यादाद्रिप्रमाणेन सह वर्षत्रिकेऽपि च ॥ २०३॥

योजनानां नवनव सहस्राणि प्रकल्पयेत् ।
एवमुत्तरतोऽप्यूह्या वर्षसंख्या विवेकिभिः ॥ २०४॥

आरभ्य मेरोर्नाभि तु न चेद्दिशि दिशीरिता ।
भग्ना पञ्चाशत्सहस्रमानसंख्या भविष्यति ॥ २०५॥

त्रयोविंशत्सहस्रेता यदिळावृतभूरियम् ।
चतुर्दक्ष्वा मेरुनाभेरा सीमाद्रिचतुष्टयात् ॥ २०६॥

सप्तविंशतिसाहस्रयोजना एव तद्बहिः ।
इमे च परितो वर्षा भवेयुस्तदयं क्रमः ॥ २०७॥

न चेत्पञ्चाशत्सहस्रयोजनत्वं कथं भवेत् ।
प्रतीच्यां केतुमालाख्यो वर्षोऽप्येक उदाहृतः ॥ २०८॥

अयमप्यपरोऽम्भोधिपर्यन्तस्समुदाहृतः ।
अत्रापि भगवान्विष्णुः कामनामा महाप्रभुः ।
कन्दर्पकोटिसदृशसौन्दर्याद्भुतमूर्तिमान् ॥ २०९ ॥

पुरुषायुरहोरात्रसंख्ययाऽऽकृतिभिः कृता ।
द्वासप्ततिसहस्राख्या तावतीभिः प्रजापतेः ॥ २१० ॥

सुताभिस्सहिता वर्षनायिकाभिस्सदा रमा ।
उपास्ते स्वपतिं दिव्यमन्त्रज्ञा मन्त्रपूरुषम् ॥ २११ ॥

पवनः पारियात्रश्चेत्यत्रापि द्वौ गिरी क्रमात् ।
इमौ च पूर्वदिक्स्थाद्रिसमानाऽऽयामविस्तरौ ॥ २१२ ॥

अयं च वर्षो गिरिभिर्विभक्तः पूर्ववत्त्रिधा ।
जम्बुद्वीपमलङ्कर्तुं निर्मात्रा हरिणैव हि ॥ २१३ ॥

नीलाद्रेरुत्तरे भागे रम्यको वर्ष इष्यते ।
अयं च नवसाहस्रयोजनैर्विस्तृतः किल ॥ २१४ ॥

अत्रापि मनुना मत्स्यरूपी नारायणः प्रभुः ।
सदा निषेव्यते वैवस्वताख्येन सहर्षिभिः ॥ २१५ ॥

मर्यादापर्वतोऽस्यापि श्वेताख्यो वर्तते किल ।
पूर्वापराब्धिपर्यन्तो दशांशोनश्च नीलतः ॥ २१६ ॥

विस्तारे नीलसदृशस्तस्याप्युत्तरभागतः ।
हिरण्मयाख्यो वर्षोऽस्य सीमाद्रिः शृङ्गवान्किल ॥ २१७ ॥

पूर्वापराब्धिपर्यन्तो विस्तृतौ श्वेत सम्मितः ।
दशांशोनः श्वेतगिरेस्सिद्धर्षिगणसेवितः ॥ २१८ ॥

वर्षेऽस्मिन्नप्यकूपाररूपिणं पुरुषोत्तमम् ।
अर्यमा सेवते नित्यं सह तद्वर्षपूरुषैः ॥ २१९ ॥

तत उत्तरकुर्वाख्यो वर्षो देवर्षिसेवितः ।
उत्तरार्णवपर्यन्तो वर्षोऽयं च निगद्यते ॥ २२० ॥

अयं च नवसाहस्रयोजनैर्विस्तृतः किल ।
सीमाद्रिभिः सहैषां च मानं दक्षिणवर्षवत् ॥ २२१॥

अत्र यज्ञवराहाख्यौ हरिर्नारायणः प्रभुः ।
धरण्या कुरुभिस्सार्धं सर्वदोपास्यते किल ॥ २२२॥

हरिवर्षादयो वर्षा दक्षिणस्यां दिशि त्रयः ।
उत्तरस्यां दिशि तथा रम्यकाद्यास्त्रयस्स्मृताः ॥ २२३॥

पूर्वापराब्धिपर्यन्तास्सर्वेऽप्यायता मतः स्मृताः ।
हिमाद्रेः पूर्वभागेऽन्यः कैलासाख्यो गिरिः किल ॥ २२४॥

उमया सहितो देवो यत्राऽऽस्ते त्र्यम्बकः प्रभुः ।
करवीराभिधस्तस्य पश्चाद्भागेऽपरो गिरिः ॥ २२५॥

तथा शृङ्गवतः पार्श्वद्वये द्वौ पर्वतौ किल ।
त्रिशृङ्गमकरौ नाम्ना सिद्धर्षिगणसंकुलौ ॥ २२६॥

एतैर्गिरिवरैर्मेरुश्चतुर्भुज इवाऽऽबभौ ।
जम्बुद्वीपो महानेषः नववर्षसमन्वितः ॥ २२७॥

मध्ये हेमाद्रिणा युक्तो मध्यमद्वीप उच्यते ।
लक्षयोजनविस्तारस्सोऽयं द्वीप उदाहृतः ॥ २२८॥

परितस्तमिमं द्वीपं क्षारोदार्णव ईरितः ।
लक्षयोजनविस्तारस्सोऽयं दिशि दिशीरितः ॥ २२९॥

प्लक्षद्वीपः ततः पश्चात् द्विगुणस्सिद्धसेवितः ।
तावानिक्षुसमुद्रश्चाप्यास्ते तत्परितः किल ॥ २३०॥

शाल्मलाख्यो महान्द्वीपस्ततोऽपि द्विगुणः किल ।
सुरासिन्धुश्च तन्मान स्तं द्वीपं परितः किल ॥ २३१॥

ततः पश्चात्कुशद्वीपः पूर्वस्मादिद्विगुणः स्मृतः ।
स च सर्पिस्समुद्रेण स्वमानेन समावृतः ॥ २३२॥

ततः क्रौञ्चाभिधो द्वीपो द्विगुणो घृतसागरात् ।
स च द्वीपः स्वप्रमाणदध्याख्योदधिना वृतः ॥ २३३॥

पूर्वद्वीपादिद्विगुणितो द्वीपश्शाकाभिधो महान् ।
मानेन तावता युक्तः क्षीराम्भोधिस्ततः परम् ॥ २३४॥

पुष्कराख्यो महान्द्वीपः पूर्वस्मादिद्विगुणः स्मृतः ।
शुभोदकसमुद्रोऽपि तावन्मानस्ततो बहिः ॥ २३५॥

हेमभूमिस्ततः पश्चाद्वज्रलेप उदाहृतः ।
लोकालोकगिरिश्चान्ते भूमिरेतावती किल ॥ २३६॥

इत्थं मेरोः पूर्वतश्च मेरोर्दक्षिणतोऽपि च ।
पश्चान्मेरोरुदीच्यां च भूरेवं सर्वतः स्थिता ॥ २३७॥

इयं भूस्सर्वजीवानां सर्वाभीष्टफलप्रदा ।
देवानां च मुनीनां च पितॄणां चक्रवर्तिनाम् ॥ २३८॥

मानुषाणां च सुखदा नारायणमःप्रिया ।
सर्वसस्योद्भवा पुण्या सर्वौषधिसमाकुला ॥ २३९॥

पुण्यारण्याश्रमोपेता पुण्यनद्युपबृंहिता ।
श्रेयस्करी तृप्तिकरी रत्नगर्भा वमुन्धरा ॥ २४०॥

धात्री किलेयं जगतस्सेयं सर्वंसहा किल ।
वराहस्याङ्कपर्यङ्का महती राजतेतराम् ॥ २४१॥

घटिकाहोरात्रपक्षमासर्त्वयनरूपतः ।
संवत्सराख्यरूपेण बृहता चोपलक्षितम् ॥ २४२॥

महाकालं स्वगतिभिः क्रमाल्लक्षयितुं नृणाम् ।
नवग्रहाणां राशीनां ताराणां सप्तयोगिनाम् ॥ २४३॥

गन्धर्वाणां च सिध्धानां नृणां पुण्यकृतामपि ।
स्फुरद्रत्नविमानानि परितः स्थानभेदतः ॥ २४४॥

सदा धर्तुं च हरिणा कृतमाश्चर्यकर्मणा ।

रत्नोज्ज्वलस्फुरद्रत्नमयीभिः परितो दिशम् ॥ २४५ ॥

स्फुरच्चक्रस्य धारावन्मण्डलाकृतिभिः क्रमात् ।
उत्तरोत्तरसंस्थाभिर्बहुसाहस्रयोजनान् ॥ २४६ ॥

मध्येमध्ये यथायोज्यान्देशानन्तरितानपि ।
स्वभासा भासयन्तीभिर्धाराभिर्बहुभिस्सदा ॥ २४७ ॥

नवग्रहाणां नवभीराशीनां च तथैकया ।
नक्षत्राणामपरया मुनीनां च तथाऽन्यया ॥ २४८ ॥

धारणाय द्वादशधा धाराश्चास्य प्रविस्तृताः ।
इदं च कालचक्राख्यनाम्ना विद्वद्भिरीरितम् ॥ २४९ ॥

हेमन्तशिशिरैक्येन पञ्चारमिति कीर्तितम् ।
मासद्वादशरूपत्वात् द्वादशारमितीरितम् ॥ २५० ॥

कालं प्रवर्तयेद्यस्मात्तत्तन्नाम्ना च कीर्तितम् ।
द्वादशारमिति प्राह पञ्चारे चक्र इत्यपि ॥ २५१ ॥

वामनाख्यहरेः सूक्तमेतस्मादेव कारणात् ।
बहुकोटिमिताकाशे परितो विस्तृतं महत् ॥ २५२ ॥

आरभ्य मेरुमूर्धानमा चोच्चध्रुवमण्डलम् ।
योजनानां षष्टिलक्षैः षल्लक्षैरयुतैरपि ॥ २५३ ॥

उच्छ्रितं शिंशुमाराख्यहरिणाऽऽनन्दमूर्तिना ।
कुण्डलीकृतमध्येन भासिताधोमुखश्रिया ॥ २५४ ॥

ऊर्ध्वीकृतोच्चपुच्छेन सहस्रादित्यतेजसा ।
स्वचक्रवदिदं चक्रं परितो भ्राम्यते किल ॥ २५५ ॥

मेरोरुपरि लग्नेन सौवर्णाक्षेण भास्वता ।
बहुकोटिप्रमाणेन धृतं स्वान्ते बृहत्तरम् ॥ २५६ ॥

चक्रं चैकं स्वर्णमयं मानसाचलमूर्धनि ।
सदा भ्रमदिदं ज्योतिश्चक्रं भ्रामयते किल ॥ २५७ ॥

इदं चक्रं कालचक्रभ्रमणायैव निर्मितम् ।
यदीदं चक्रमर्कस्य गतेरेव कृतं भवेत् ॥ २५८॥

त्वरिता कालचक्रस्य गतिः केन भवेत्तदा ।
विरुद्धगतियुग्मं तु चक्रेणैकेन को वदेत् ॥ २५९॥

अतस्सूर्यरथोऽप्यन्यस्तच्चक्रं चापरं भवेत् ।
इदं तु चक्रं सुमहज्ज्योतिश्चक्रप्रवर्तकम् ॥ २६०॥

शिंशुमारप्रभावेनैवास्य च भ्रमणं सदा ।
कथं यन्त्रोपरिस्थाश्चैस्तद्यन्त्रभ्रमणं भवेत् ॥ २६१॥

कालचक्रस्थसूर्यस्य कथं मन्दप्रचारणम् ।
शनैश्चारयितुं चास्य मध्ये चक्रान्तरं भवेत् ॥ २६२॥

रथं धारयदेकं हि चक्रं तस्याध एव हि ।
लोकेऽपि दृश्यते तद्वद्वक्तव्यं सर्वथाऽत्र च ॥ २६३॥

ज्योतिश्चक्रगतेरन्या गतिर्नोचेत्कथं रवेः ।
यत्सूर्यरथयात्रा च ग्रहान्तररथोपमा ॥ २६४॥

कालचक्रस्य धारासु रथास्तत्तद्ग्रहोचिताः ।
हिरण्मयास्सन्ति नोचेद्गतिस्तेषां कथं भवेत् ॥ २६५॥

तत्कालचक्रधारायां सप्तास्वास्सवितूरथम् ।
चक्रेणैकेन परितश्चारयन्ति दिनेदिने ॥ २६६॥

यत्तु चक्रं मानसाख्यगिरेर्मूर्धनि पर्यटत् ।
हिरण्मयं रत्नकान्त्या परितो भासयद्दिशः ॥ २६७॥

बहुयोजनविस्तारमृताख्यस्य हरेः प्रियम् ।
शिंशुमारस्वरूपेण हरिणा प्रेरितं तु तत् ॥ २६८॥

बृहद्रथोपमं ज्योतिर्मयं चक्रोपमत्वतः ।
कालचक्राभिधानं यज्ज्योतिर्मण्डलमुत्तमम् ॥ २६९॥

तद्दिवः परितो नित्यं भामयेत्त्वरितं किल ।
मेरुं प्रदक्षिणीकृत्य कालचक्रं च तद्बलात् ॥ २७०॥

शिंशुमारप्रभावाच्च योजनानां दिनेदिने ।
नवकोटिं लक्षमेकं पञ्चाशल्लक्षमेव च ॥ २७१॥

परिभ्रमति नक्षत्रग्रहराशिगणैस्सह ।
शीतोष्णमध्यभेदेन त्र्यात्मकत्वात्त्रिनाभि यत् ॥ २७२॥

अनर्वमश्वशून्यत्वात्तस्थौ यस्मिन्किलाखिलम् ।
ग्रहनक्षत्रदेवर्षिसिद्धगन्धर्वसेवितम् ॥ २७३॥

कालचक्रमिदं शिंशुमारदेवात्प्रवर्तते ।
सप्तविद्याश्च यन्नाम सदैवाशुगमित्वतः ॥ २७४॥

अश्वाख्या एक एवेदं वहतीति यतः श्रुतिः ।
सप्ताश्वनुन्नं तच्चक्रमन्यदेव रथे रवेः ॥ २७५॥

यथा सर्वगतो विष्णुर्न रुणद्धि जगद्गतिम् ।
श्वेतद्वीपस्तथैवास्य गतेर्न प्रतिबन्धकः ॥ २७६॥

यत्समानत्रिंशदहोरात्राणीति वचस्तु तत् ।
त्रिंशत्पदस्योपरिष्टाद्घटिकापदवज्ज्ञवेत् ॥ २७७॥

यन्मध्यपदलोपाख्यसमासोऽप्युच्यते बुधैः ।
मुहूर्तानि भवन्तीति वाक्च कल्पककल्प्ययोः ॥ २७८॥

ऐक्याभिप्रायतः प्रोक्ता सर्वज्ञव्यासयोगिना ।
अतः समानास्त्रिंशत्यो घटिका यत्र तद्दिनम् ॥ २७९॥

सा रात्रिश्च मुहूर्तस्य मानकृत्यै भवेदिति ।
अर्थोऽभूत्स्मृतिवाक्यस्य युक्तितो नतु शक्तितः ॥ २८०॥

इदं चार्के मेषतुलासंस्थे स्यान्नान्यथा भवेत् ॥
दिनवृद्धिह्रासयुक्तौ नैतौ मासावुभौ यतः ॥ २८१॥

त्रिंशत्त्रिंशद्घटिकताऽत्रैव तन्निशि चाग्नि च ।

चतुर्विंशतिसंख्याता घटिका याः षडुत्तराः ॥ २८२॥

ताः षड्भ्योऽर्धं समादाय मुहूर्तान्द्वादशाञ्जसा ।
कुर्युरह्नि च रात्रौ तत्तुलामेषाख्यमासयोः ॥ २८३॥

यत्सार्धघटिकाद्वन्द्वं मुहूर्तं सूरयो विदुः ।
वृषभाद्ये तु राशीनां पञ्चकेऽर्के स्थिते सति ॥ २८४॥

वर्धन्तेऽहानि रात्रिस्तु क्रमात्संक्षयते तदा ।
वृश्चिकादिषु राशिष्वप्येवमर्के स्थिते सति ॥ २८५॥

दिनानि ह्रसितानि स्युर्वर्धन्ते रात्रयोऽपि च ।
तद्द्वादश मुहूर्तानि कथं रात्रेर्दिनस्य च ॥ २८६॥

तदा भवेयुस्तेनात्र न मुहूर्तस्य कल्पना ।
अतो मेषस्थिते भानौ तुलास्थे वा प्रकल्पयेत् ॥ २८७॥

मुहूर्तमानं नान्यत्रेत्याह भागवते शुकः ।
त्रिंशल्लक्षाणि चत्वारि लक्षाण्यष्टशतानि च ॥ २८८॥

योजनानां मुहूर्तेऽस्मिन्नैकैकस्मिन्नवे रथः ।
कालचक्रस्थितो मन्दं पर्यटेत्परितः किल ॥ २८९॥

एवं च कोट्यष्टकानि तथा लक्षाणि षोडश ।
विंशतिं च सहस्राणां सूर्यो याति दिनेदिने ॥ २९०॥

इदं सूर्यगतेर्मानं यदीषच्छ्रनकैर्हि सा ।
प्रागुक्तगतिमानं तु त्वरया परितो दिवम् ॥ २९१॥

गच्छतः कालचक्रस्येत्याह भागवते शुकः ।
अतो विरुद्धशङ्काऽत्र नैव कार्या विचक्षणैः ॥ २९२॥

लक्षोच्छ्रितः सूर्यरथस्सारुणः सप्तवाहनः ।
कालचक्रस्थितान्राशीन् मन्दं मन्दं व्रजन्क्रमात् ॥ २९३॥

पृष्ठेपृष्ठे स्थितं राशिं स्पृशेन्नोत्तरगामिनम् ।
अतो वामगतिः प्रोक्ता चक्रधारास्थितस्य च ॥ २९४॥

क्रमेण पृष्ठराशिं तु मासमात्रे स्पृशेद्रविः ।
चन्द्रश्चापि ततो मन्दगतित्वात्पृष्ठतः स्थितम् ॥ २९५ ॥

राशिं सार्धदिनद्वन्द्वेनैव संस्पृशति क्रमात् ।
अतस्त्वरा पृष्ठगतौ न तूत्तरगतौ विधोः ॥ २९६ ॥

संवत्सरेण तु गुरुः पृष्ठराशिं स्पृशेत्किल ।
शनिर्वर्षद्वयेनैव पृष्ठेपृष्ठेऽधिगच्छति ॥ २९७ ॥

अतिमन्दगतित्वात्सः शनैश्चर इतीरितः ।
एवं ग्रहाणां सर्वेशां गतिर्वामेति कीर्त्यते ॥ २९८ ॥

यथा पिपीलिकाधारा तैलयन्त्रे त्वरावति ।
पृष्ठेपृष्ठे भवेन्मन्दं यान्ति तद्वद्ग्रहा इमे ॥ २९९ ॥

यदि ग्रहरथास्सर्वे गच्छेयुर्वामभागतः ।
तर्हि सूर्योदये सूर्यपृष्ठमेवेक्ष्यते नरैः ॥ ३०० ॥

अर्घ्यं कस्य करे दद्युर्गायत्र्या मन्त्रितैर्जलैः ।
अतोऽस्मदुक्तमार्गेणैव वामगतिं वदेत् ॥ ३०१ ॥

सव्येन दक्षिणेनापि सविता कुरुतेऽचलम् ।
इति मूलोदिता वाक्चाप्यसूचयदिमां गतिम् ॥ ३०२ ॥

साक्षाद्वामगतौ सव्यदक्षिणत्वं कथं गिरेः ।
कथं चान्तर्गतं विष्णुं शिंशुमारममी सुराः ॥ ३०३ ॥

परिभ्रमेयुस्सततमप्रदक्षिणयात्रया ।
अक्षाग्रखचिता चैका तुला स्थूला हिरण्मयी ॥ ३०४ ॥

ध्रुवमण्डलसंलग्ना कालचक्रं च बिभ्रती ।
तेनैव सह गच्छेच्च न चेच्चक्रं पतेद्धि तत् ॥ ३०५ ॥

नक्षत्राणां च राशीनामुत्तरोत्तरगामिनाम् ।
प्रदक्षिणा गतिः प्रोक्ता कालचक्रनिवासिनाम् ॥ ३०६ ॥

चतुःपञ्चादिघटिकारूपराशिस्थदेवताः ।
घटिकामानिनस्तावद्यानैर्गच्छन्ति भास्वरैः ॥ ३०७ ॥

मेरुं प्रदक्षिणीकुर्वत्कालचक्रस्थिता अपि ।
ग्रहाः स्वस्वरथैस्तस्मिन् गच्छन्तोऽपि दिनेदिने ॥ ३०८ ॥

तद्वत्त्वराया राहित्यात्पृष्ठेपृष्ठे भवन्ति हि ।
भूमेर्नवतिसाहस्रयोजनोत्तुङ्गवर्त्मनि ॥ ३०९ ॥

कालचक्रादिधारायां राहोर्मण्डलमीरितम् ।
तत्रैव केतुशतकं राहुणा सह तिष्ठति ॥ ३१० ॥

चक्रच्छिन्नं राहुशिरो हरिणाऽद्भुतकर्मणा ।
सुधापानस्य सामर्थ्याद्भास्वरं चाप्यनश्वरम् ॥ ३११ ॥

ग्रहमण्डलतामेत्य स्थितं केतुशतान्वितम् ।
उपद्रवाय लोकानां चन्द्रसूर्यग्रहाय च ॥ ३१२ ॥

राहोरंशोऽपि तत्राल्पो वर्तते न स पूज्यते ।
तन्नाम्ना याज्ञिकैर्दत्ताप्याहुतिस्तद्गतैस्सुरैः ॥ ३१३ ॥

हरिणा वा हृदिस्थेन भुज्यते नतु राहुणा ।
लक्षयोजनतोऽप्यूर्ध्वं चक्रधारान्तरोपरि ॥ ३१४ ॥

रविः पर्येति महसा भासयन्सर्वतो दिशम् ।
ततोऽपि लक्षाद्ऊर्ध्वं तु चक्रधारान्तरोपरि ॥ ३१५ ॥

स्वस्वराशिगतो नित्यं शशी पर्येति सर्वदा ।
पूर्णमण्डलतायां तु सूर्याद्भागान्तरे व्रजेत् ॥ ३१६ ॥

सूर्येन्दुकलयोरेकराशौ योगो भवेद्यदा ।
दर्शमाहुस्तदा राहोरप्यधः सूर्यमण्डलात् ॥ ३१७ ॥

यदैकराशौ योगः स्यात्तदाऽऽहुर्ग्रहणं बुधाः ।
अधो वाऽप्यूर्ध्वदेशे वा राशेः साम्येन या गतिः ॥ ३१८ ॥

स एव योगः सर्वेषां न त्वेकत्र सह स्थितिः ।

ऊर्ध्वाधोगामिनां तेषां कथमेकत्र सङ्गमः ॥ ३१९ ॥

पञ्चग्रहादियोगं चाप्येवमाहुर्विचक्षणाः ।
त्रिंशल्लक्षोपरिं विधोर्नक्षत्रगतिरीरिता ॥ ३२० ॥

मध्यधारासु गन्धर्वसिद्धाद्याः पुण्यकर्मिणः ।
भास्वद्विमानकोटिस्था रमन्ते सस्त्रियः सदा ॥ ३२१ ॥

षड्रसान्नानि भुञ्जानाः फलानि विविधानि च ।
पिबन्तश्च वियद्गङ्गातोयं स्वादु च अशीतलम् ॥ ३२२ ॥

गायन्तश्चैव नृत्यन्तः क्रीडन्तः परितः किल ।
तारारूपेण तद्यानान्यसंख्यानि भुवि स्थितैः ॥ ३२३ ॥

नरैरद्यापि दृश्यन्ते ज्योतिश्चक्रं ततो विदुः ।
ताराचन्द्रमसोर्मध्ये राशीनां तु गतिः स्मृता ॥ ३२४ ॥

लक्षद्वयोर्ध्वमृक्षेभ्यो ह्युक्ता ह्युशनसो गतिः ।
ततो लक्षद्वयादूर्धवं बुधस्य गतिरीरिता ॥ ३२५ ॥

तस्माल्लक्षद्वयादूर्ध्वं कुजस्याहुर्गतिं बुधाः ।
अनन्तरं सुरगुरोर्गतिर्लक्षद्वयोपरि ॥ ३२६ ॥

शनैश्चरस्यापि गतिः किल लक्षद्वयोपरि ।
एकादशेभ्यो लक्षेभ्योऽप्यूर्ध्वं सप्तर्षिमण्डलम् ॥ ३२७ ॥

तदन्तरा योजनानां लक्षाण्याहुश्चतुर्दश ।
सप्तर्षिमण्डलादूर्ध्वं ध्रुवस्य किल मण्डलम् ॥ ३२८ ॥

एषां ग्रहाणां सर्वेषां सदा सञ्चरतां किल ।
अग्रे गायन्ति गन्धर्वा नृत्यन्त्यप्सरसः सदा ॥ ३२९ ॥

गन्धपुष्पान्नपानादिभोगाश्च स्युः पदेपदे ।
मन्त्रांश्च विविधानेषां भूमिस्था द्विजपुङ्गवाः ॥ ३३० ॥

पठन्ति प्रणमन्त्येनान् होमे होमे च जुह्वति ।
सतां शुभफलं दद्युरसतां च विपर्ययम् ॥ ३३१ ॥

कालचक्रोच्छ्रयस्त्वेवं विस्तरस्तस्य कीर्तितः ।
क्षीराब्धि परितः पुष्कराख्ये द्वीपे मनोरमे ॥ ३३२॥

मानसोत्तरशैलोऽस्ति चतुर्दिक्ष्वपि भास्वरः ।
तदन्तरप्रदेशोऽपि कोटिद्वन्द्वेन विस्तृतः ॥ ३३३॥

पञ्चाशल्लक्षसहितलक्षयोजनतोऽपि च ।
सञ्चरन्त्यत्र सर्वत्र ज्योतिश्चक्रमहर्निशम् ॥ ३३४॥

तावत्प्रमाणं विज्ञेयं विद्वद्भिर्न्यायकोविदैः ।
व्योम्नोऽपराब्धिद्वारेण पातालं प्रविशन्निनः ॥। ३३५॥

पूर्वाम्बुधावुदेतीति केचिदाहुरकोविदाः ।
वेदवादविरोधित्वान्न तन्मतमनुव्रजेत् ॥ ३३६॥

उदयास्तगिरी यस्मात्किञ्चिन्मेरोरधः स्थितौ ।
तत्रावतीर्य चक्रं तत्पुनर्यन्त्रप्रभावतः ॥ ३३७॥

तैलयन्त्रवदुद्याति तद्भ्रान्तिर्मन्दचक्षुषाम् ।
पातालेऽप्यपरं चक्रं सूर्याचन्द्रमसोः किल ॥ ३३८॥

ऊर्ध्वोधो गमनं तस्य भारतेऽपि समीरितम् ।
योजनायुतविस्तारपाताले तिग्मदीधितेः ॥ ३३९॥

उदये सति तन्नित्यान् दिवातापेन मूर्छितान् ।
निशि शीतांशुकिरणा जीवयन्ति पुनःपुनः ॥ ३४०॥

ततो वा भ्रान्तिरेतेषां रज्जौ भुजगबुद्धिवत् ।
यतः श्रुतिः सूर्यगतिमारोहन्नुत्तरां दिवम् ॥ ३४१॥

इत्याह तेन व्यासोक्तिरेव मान्या न चापरा ।
वेदव्यासः स भगवान्साक्षान्नारायणः किल ॥ ३४२॥

किंच सप्तर्षिगमनं मण्डलाकारतः स्थितम् ।
अद्यापि दृश्यते सर्वैर्ज्योतिश्चक्राग्रगा हि ते ॥ ३४३॥

अतो ज्योतिश्चक्रमिदं मेरुं कनकपर्वतम् ।
प्रदक्षिणीकृत्य सदा जगद्भासयते ध्रुवम् ॥ ३४४ ॥

हैममण्डं योजनानां शतकोटि प्रविस्तृतम् ।
अर्बुदं योजनानि स्युरपां गणकसंख्यया ॥ ३४५ ॥

निर्बुदं योजनानि स्युस्तेजोरुपावृतेर्बहिः ।
वायोस्तु खर्वसंख्या तु योजनानां ततः परम् ॥ ३४६ ॥

योजनानां महाखर्वमाकाशस्य प्रकीर्तितम् ।
पद्मं तु योजनानां स्यादहङ्कारस्य तद्बहिः ॥ ३४७ ॥

महापद्मं योजनानां महत्तत्वस्य तद्बहिः ।
क्षोणी तु तमसः प्रोक्तं महाक्षोण्या रजः स्मृतम् ॥ ३४८ ॥

शङ्खः सत्वगुणस्य स्याद्दशमावरणस्य तु ।
अण्डान्तराण्डकोशस्तु पञ्चशत्कोटिविस्तृतः ॥ ३४९ ॥

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः ।
इति श्रुतेरसंख्यातब्रह्मणां चक्रवर्तिनाम् ॥ ३५० ॥

मनुष्यपशुपक्ष्यादिजीवानां च दिवौकसाम् ।
सर्पाणां दानवानां च यक्षगन्धर्वजन्मनाम् ॥ ३५१ ॥

नानाजलचराणां च पिशाचानां च कोटिशः ।
देहाख्यदिव्यमांसैश्च मृत्युर्यस्योपसेचनम् ॥ ३५२ ॥

इति श्रुतेर्मारकाणां देहाख्यधृतसंस्कृतैः ।
लवणेक्षुसुरासर्पिर्दधिक्षीरशुभोदकैः ॥ ३५३ ॥

नानारसौघपानीयस्थानीयैरपि संकुलै ।
चित्रौषधाख्यशाकैश्च वनस्पतिभिरेव च ॥ ३५४ ॥

नानापक्वफलोपेतैर्मिश्रितं विश्वमीदृशम् ।
सङ्कर्षणाग्निना पक्वमण्डाख्ये हैमभाजने ।
स्वयं पाकीव भगवान् महाकायो जनार्दनः ॥ ३५५ ॥

भुक्त्वा पुनर्जीर्तिकाम इव सौवर्णभस्म च ।
अण्डदाहसमुद्भूतं स्वान्तस्थेन महाग्निना ॥ ३५६ ॥

पुनःपुनश्च क्वथितं बहिरावरणोदकम् ।
स्वीकृत्य भार्यया लक्ष्म्या सह तद्रूपवारिधौ ॥ ३५७ ॥

वटपत्रपुटे शेते निद्राळुरिव लीलया ।
इत्थं भुवनमर्यादा कीर्तिता प्रीतये हरेः ॥ ३५८ ॥

मध्वस्य वाण्या देवानां गुरूणां च सदा मुदे ।
पूर्णबोधार्यभक्तेन वादिराजाख्यभिक्षुणा ॥ ३५९ ॥

वाक्यार्थकथनव्याजाद्भूजोळमिति वर्णितम् ॥ ३६० ॥

नमोऽस्तु लक्ष्मीपतये गतयेऽखिलयोगिनाम् ।
नमोऽस्तु पूर्णप्रज्ञाय शास्त्राभिज्ञाय सर्वदा ॥ ३६१ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

भूगोळवर्णनं समाप्तम्

मध्वमुनिप्रतापाष्टकम्

क्वचित्सुरान्शास्ति सुराङ्गनाः क्वचित्
क्वचिच्च गन्धर्वपतीनृषीन् क्वचित् ।
क्वचित्पितॄन् क्वापि नृपान्नरान्क्वचि-
च्छुभानयं मध्वमुनिः प्रतापवान् ॥ १॥

क्वचित्प्रभुं स्तौति समीक्षते क्वचित्
क्वचित्स्मरन्नृत्यति गायति क्वचित् ।
क्वचित्तमाराधयतीश्वरं क्वचि-
न्नमत्ययं मध्वमुनिः प्रतापवान् ॥ २॥

क्वचिद्धरेर्जीवजडातिभिन्नतां
क्वचित्प्रभोः सर्वगुणैश्च पूर्णताम् ।
क्वचिच्च तस्याखिलदोषशून्यतां
वदत्ययं मध्वमुनिः प्रतापवान् ॥ ३॥

क्वचिच्च विष्णोरुरुचित्ररूपतां
क्वचिच्च मुक्ताखिलजीवयन्तृताम् ।
क्वचिच्च तस्याव्ययचिन्मयाकृतिं
व्यनक्त्ययं मध्वमुनिः प्रतापवान् ॥ ४॥

क्वचित्स्मृतीः क्वापि पुराणसंहिताः
प्रवक्ति सूत्रं क्वचिदागमोक्तिभिः ।
क्वचिच्च धर्मं चरति क्वचिच्च तं
ब्रवीत्ययं मध्वमुनिः प्रतापवान् ॥ ५॥

क्वचिच्च चार्वाककणादगौतम-
प्रभाकराद्वैतितथागतादिकैः ।
कृतं मतं युक्तिशतैर्विखण्डयन्
विभात्ययं मध्वमुनिः प्रतापवान् ॥ ६॥

परान्पराभावयति क्वचित्क्वचि-
न्निजान्कथायां कुशलीकरोत्ययम् ।

क्वचिद्बुधान्वैष्णवमार्गमागतान्
पुनात्ययं मध्वमुनिः प्रतापवान् ॥ ७॥

क्वचित्समस्तागमनिर्णयोदिताः
कृतीः कृता व्याकुरुते सभान्तरे ।
प्रहृष्टरोमा नृहरौ क्वचिन्मनो
युनक्त्ययं मध्वमुनिः प्रतापवान् ॥ ८॥

इदं प्रतापाष्टकमच्युतप्रिय-
श्रुतिप्रतीतामलमध्वयोगिनः ।
यतिस्तदीयोऽकृत वादिराज
उदारधीस्तस्य कृपाफलाप्तये ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

मध्वमुनिप्रतापाष्टकं सम्पूर्णम्

मुख्यप्राणाष्टकम्

भक्तिं श्रीरमणस्य पादयुगले प्रीत्या प्रदेहीश
मच्चित्तं तत्पादपद्मचिन्तनरतं नित्यं विधेह्यच्युतम् ।
त्वत्तातं मयि सुप्रसन्नमधुना विज्ञाप्य कुर्वञ्जसा
स्वामिन्प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ १॥

त्वय्युत्तिष्ठति यत्कलेवरमभूत्पातैकपात्रं सुरा-
स्त्रातुं नैव हि शेकुरादिपुरुषोऽप्यासीदुपेक्षारतः ।
श्वासाख्यं मनुमस्य यत्तव वशं ब्रूतेऽविगीता श्रुतिः
सत्वं प्राणगणाधिनाथ दयया दासं हि मां पालय ॥ २॥

येनाऽऽत्मीयजिनावनाय बलिना नीतः पुरोच्चाचल-
स्तीर्णः पूर्णपयोनिधिः खलहृता दृष्टा च सीताकृतिः ।
तत्ते किं कथनीयमस्ति जगति व्यक्तस्य सत्पालने
स्वामिन्नामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः ॥ ३॥

सेवाभिः परितुष्टधीः कविजनैर्गयाभिराद्यः पुमान्
ब्रह्माणं किल भाविनं समतनोत्सन्तं भवन्तं प्रभुः ।
साम्राज्ये सति विस्मृतिर्निजजने निन्द्या हि यत्वादृशां
स्वामिन्नामपदाब्जभृङ्ग तदव श्रीमन्हनूमन्नमः ॥ ४॥

कामी येन हि कीचको विनिहतः क्रोधी च दुःशासनः
स्तब्धो लुब्धसुयोधनश्च मणिमान्मुग्धो मदान्धो बकः ।
कृष्णेर्ष्याभिरतश्च मागधपतिः षड्वैरिवर्गात्सदा
स त्वं भीम गुणाभिराम दयया दासं हि मामुद्धर ॥ ५॥

दाहाद्येन विमोचितो निजजनस्य त्वं भवाग्नेरव
स्वीयाध्वप्रतिबन्धकश्च निहतः किर्मीरनामा रणे ।
प्रोद्यन्मध्वमताध्वगस्य सदय प्रत्यर्थिनस्सादय
स्वामिन्सोमकुलाग्रगण्य भवतः पोतं हि मां न त्यज ॥ ६॥

विद्वत्सिन्धुम(गृ)होदय द्विजपथप्रज्ञप्तिबीजोदय
प्रत्यर्थ्यम्बुजमुद्रण प्रियजनप्रत्यूहघर्मार्दन ।

हृल्लग्नामलकृष्णसस्मितदयावीक्षासुधाधिष्ण्य मां
श्रीमन्मध्वमुनीन्द्रचन्द्रकुमुदस्थानीयमुद्बोधय ॥ ७॥

यद्वागाख्यकराः सतां सुखकराः दुर्वादिगर्वज्वराः
सद्विद्याम्बुधिपोषको यदुदयोऽविद्याम्बुधेः शोषकः ।
यः शर्वेण शिरोधृतोऽपि विशदं चक्रे मुरारेः पदं
सोऽव्याद्वृतमध्वतारकपतिर्हार्दान्धकारच्युतिः ॥ ८॥

पद्यानामिदमष्टकं प्रविलसन्मध्वाकृतिस्पष्टकं
तद्दासप्रियवादिराजयतिना तद्दत्तवाग्भूतिना ।
हृद्यं यः पठतीरितं सुचरितं सः स्याद्दिशामष्टके
माद्यन्मायिमतङ्गभङ्गकरणे सिंहप्रबर्हप्रभः ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

मुख्यप्राणाष्टकं सम्पूर्णम्

रमेशस्तुतिः

प्रातः स्मरामि वरकुण्डलशोभिगण्डं
शीतांशुमण्डलमुखं सितवारिजाक्षम् ।
आताम्रकम्रमुदिताधरबिम्बजृम्भि-
ध्यातृप्रहर्षकरहासरसं रमेशम् ॥ १॥

प्रातर्भजामि शुभकौस्तुभकम्बुकण्ठं
स्फीतात्मवक्षसि विराजितभूरिहारम् ।
भीतस्वभक्तभयभञ्जनपाणिपद्मं
शातोदरार्पितजगद्वरमब्जनाभम् ॥ २॥

प्रातर्नमामि शुभकिङ्किणिमेखलाङ्गं
पीताम्बरं करिकरोरुमुदारजानुम् ।
ख्यातांघ्रियुग्मरुचिरं जितकञ्जजात-
वातादिदेववरमौलिमणिं मुकुन्दम् ॥ ३॥

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम् ।
प्रातःकाले पठन् मर्त्यः पापेभ्यः प्रविमुच्यते ॥ ४॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

रमेशस्तुतिः सम्पूर्णा

रामदशकम्

हे राम जलदश्याम स्वामिन्निर्दोष पूरुष ।
भीमतामसयोनीनां मामा मुञ्च तवानुगान् ॥ १॥

उपकृत्यै सज्जनानामपकृत्यै तथाऽसताम् ।
नमतामंहसो हत्यै भूत्यै सर्वदिवौकसाम् ॥ २॥

भीत्यै खरादिदैत्यानां प्रीत्यै च वनवासिनाम् ।
स्वस्यापि महिमोन्नत्यै नीत्यै चारण्यचारिणौ ॥ ३॥

ब्रह्मरुद्रादिभिर्देवैरर्चितौ श्रुतिचर्चितौ ।
ज्ञानानन्दमयौ ध्यातृप्रियौ सर्वगुणाश्रयौ ॥ ४॥

ध्वजवज्राङ्कुशाम्भोजराजितौ राजपूजितौ ।
रक्तपद्मोपमौ ध्वस्तश्रमौ विद्रावितभ्रमौ ॥ ५॥

नारीकृतशिलौ रम्यतळौ दिव्याङ्गुलीदलौ ।
वृत्तमौक्तिकसङ्काशनखौ त्रिजगतीसुखौ ॥ ६॥

विचित्रभूषणोपेतौ भीषणौ त्यक्तदूषणौ ।
लक्ष्मीधराकराम्भोजसेवितौ सिद्धभावितौ ॥ ७॥

अनन्तवैदिकपदास्पदौ स्वजनसम्पदौ ।
अजाण्डभङ्गनौ धूताङ्गनौ भुवनरङ्गनौ ॥ ८॥

क्ष्माभारहारिणौ मुक्तिकारिणौ भववैरिणौ ।
पार्थदत्तधनौ युक्तयाऽपार्थिंकृतसुयोधनौ ॥ ९॥

तेवनौत्सुक्यतो भूमिपावनौ प्रणतावनौ ।
सीताभिरामौ श्रीरामचरणौ शरणं मम ॥ १०॥

इमानि दश पद्यानि श्रमापहृतये सताम् ।
यतिना वादिराजेन कृतिना रचितानि वै ॥ ११॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीरामदशकं सम्पूर्णम्

रामकवचम्

कपिकटकधुरीणः कार्मुकन्यस्तबाणः
क्षपितदितिजसैन्यः क्षत्रियेष्वग्रगण्यः ।
जलधिरचितसेतुर्जानकीतोषहेतुः
पथि पथि गुणसान्द्रः पातु मां रामचन्द्रः ॥ १॥

श्रीमत्किरीटविभ्राजिशिरा रामः शिरोऽवतु ।
कुटिलालकसंशोभिललाटान्तः सुरार्थितः ॥ २॥

माणिक्यमौक्तिकोद्भासितिलकः सूर्यवंशजः ।
ललाटं पातु सुभ्रूर्मे कौसल्यानन्दनो भ्रुवौ ॥ ३॥

धनुर्विद्यापारदृश्वा नेत्रे पात्वब्जलोचनः ।
लसन्नासापुटो नासां विश्वामित्रवृतोऽवतु ॥ ४॥

बिम्बोष्ठोऽव्यान्मदीयौष्ठौ शम्भुकार्मुकभञ्जनः ।
कुन्दकोशलसद्दन्तो दन्तान्मे जानकीपतिः ॥ ५॥

मनोज्ञरसनो जिह्वां पातु लोकमयान्तकृत् ।
वाचं व्याख्याविदग्धोऽव्याच्यक्तसाम्राज्यसम्भ्रमः ॥ ६॥

आस्यं चन्द्रोपमास्योऽव्याद्रामचन्द्रो वनेचरः ।
कम्बुग्रीवोऽवतु ग्रीवां खरदूषणसैन्यजित् ॥ ७॥

चारुदीर्घकरः पाणी मारीचमृगलुब्धकः ।
कङ्कणाङ्गदमुद्राढ्योऽङ्गुलीस्त्यक्तप्रियाकृतिः ॥ ८॥

पातु पीनांसयुग्मोऽसौ हनूमन्नयनोत्सवः ।
हारकौस्तुभभृत्कण्ठमूलं सुग्रीवसख्यकृत् ॥ ९॥

उरः पातु महोरस्कः तालात्मासुरखण्डनः ।
मध्यं कृशलसन्मध्यः पातु वात्यङ्गभेदनः ॥ १०॥

दर्भशायी विभुः पातु वलीस्त्रिवलिपल्लवः ।
तनुदरः पातु कुक्षिं कृतसेतुर्महार्णवे ॥ ११॥

निम्ननाभिः प्रभुः पातु नाभिं कपिचमूपतिः ।
पीताम्बरः स्फुरत्काञ्चीद्योतमानकटिद्वयः ॥ १२॥

लङ्काप्राकारनिर्भेदी रामः पातु कटिं मम ।
ऊरू करिकरोरुर्मे चारुबाणधनुर्धरः ॥ १३॥

जृम्भिरावणसैन्याब्धिकुम्भसम्भवकोटिधूः ।
जानुनी वृत्तविलसज्जानुयुग्मो ममावतु ॥ १४॥

कुम्भकर्णादिनिर्भङ्गदम्भोळासमसायकः ।
जङ्घे तुङ्गेभदन्ताभजङ्घायुग्मोऽवतु प्रभुः ॥ १५॥

दशाननशिरोरण्यपरश्वधपराक्रमः ।
मुक्ताङ्कुरसमश्रीमद्गुल्फों गुल्फौ ममावतु ॥ १६॥

ससम्भ्रमसुरश्रेणीशिरोजुष्टाङ्घ्रिपल्लवः ।
पादौ रक्षतु मे नित्यं विभीषणपदप्रदः ॥ १७॥

नखान् पातु नखश्रेणीशशिद्योतितदिङ्मुखः ।
अग्निज्वालोदितस्वीयसीतो वीतच्छिदाकृतिः ॥ १८॥

रक्तपादतलादित्यः पातु पादतले मम ।
प्राप्तायोध्यापुरैश्वर्यः प्राच्यां पातु मनोरमः ॥ १९॥

धर्मप्रवर्तकः पायादवाच्यां नीरदद्युतिः ।
पातु प्रतीच्यां यज्वीन्द्रो हनूमत्पारमेष्ठ्यदः ॥ २०॥

उदीच्यामुद्गतायोगविदेहतनयाप्रियः ।
अधोऽधःकृतपापौघः पातु रामोऽखिलाग्रणीः ॥ २१॥

ऊर्ध्वमुन्नीतसज्जीवनानासङ्गसुखप्रदः ।
य इदं रघुनाथस्य कवचं बिभृयान्नरः ॥ २२॥

यतिना वादिराजेन रचितं निर्मलं दृढम् ।

स्प्रष्टुं तं नैव रक्षांसि पापानि रिपवोऽपि वा ॥ २३॥

विपदो व्याधयो वाऽपि शक्नुवन्ति शरोपमाः ।
अरिं जित्वा तु संसारं यास्यत्यन्तेऽपुनर्भवम् ॥ २४॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीरामकवचं सम्पूर्णम्

रौप्यपीठकृष्णस्तुतिः

पालयाच्युत पालयाजित पालयाकमलालय ।
लीलया धृतभूधराम्बुरुहोदर स्वजनोदर ॥ ध्रु० ॥

मध्वमानसपद्मभानुसमं स्मर प्रतिसंस्मर
स्निग्धनिर्मलशीतकान्तिलसन्मुखं करुणोन्मुखम् ।
हृद्यकम्बुसमानकन्धरमक्षयं दुरितक्षयं
स्निग्धसंस्तुतरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ १॥

अङ्गदादिसुशोभिपाणियुगेन संक्षुभितैनसं
तुङ्गमाल्यमणीन्द्रहारसरोरसं खलनीरसम् ।
मङ्गलप्रदमन्थदामविराजितं भजताजितं
तं गृणे वररौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ २॥

पीनरम्यतनूदरं भज हे मनः शुभ हे मनः
स्वानुभावनिदर्शनाय दिशन्तमर्थिसुशन्तमम् ।
आनतोऽस्मि निजार्जुनप्रियसाधकं खलबाधकं
हीनतोज्झितरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ३॥

हेमकिङ्किणिमालिकारसनाञ्चितं तमवञ्चितं
रक्तकाञ्चनचित्रवस्त्रकटिं घनप्रभया घनम् ।
कम्रनागकरोपमोरुमनामयं शुभधीमयं
नौम्यहं वररौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ४॥

वृत्तजानुमनोज्ञजङ्घममोहदं परमोहदं
रत्नकल्पनखत्विषा हृतमुत्तमस्स्तुतिमुत्तमम् ।
प्रत्यहं रचितार्चनं रमया स्वयाऽऽगतयास्वयं
चित्त चिन्तय रौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ५॥

चारुपादसरोजयुग्मरुचाऽमरोच्चयचामरो-
दारमूर्धजभानुमण्डलरञ्जकं कलिभञ्जकम् ।
वीरतोचितभूषणं वरनूपुरं स्वतनूपुरं
धारयाऽऽत्मनि रौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ६॥

शुष्कवादिमनोऽतिदूरतरागमोत्सवदागमं
सत्कवीन्द्रवचोविलासमहोदयं महितोदयम् ।
लक्षयामि यतीश्वरैः कृतपूजनं गुणभाजनं
धिक्कृतोपमरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ७॥

नारदप्रियमाविशाम्बुरुहेक्षणं निजलक्षणं
तारकोपमचारुदीपरुचान्तरे गतचिन्त रे ।
धीर मानस पूर्णचन्द्रसमानमच्युतमानम-
द्वारकोपमरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ८॥

रौप्यपीठकृतालयस्य हरेः प्रियं दुरितापियं
तत्पदार्चकवादिराजयतीरितं गुणपूरितम् ।
गोप्यमष्टकमेतदुच्चमुदे ममास्त्विह निर्मम
प्राप्यसौख्यफलाय तत्र सुकोमलं हृतधीमलम् ॥

पालयाच्युत पालयाजित पालयाकमलालय ।
लीलया धृतभूधराम्बुरुहोदर स्वजनोदर ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

श्रीरौप्यपीठकृष्णस्तुतिस्समाप्ता

लक्ष्म्यार्यावृत्तम्

आर्यावृत्तविचित्रा नार्यास्सा जगति सौभगत्वकरी ।
वाय्वा(र्या)काशाद्यखिला भूर्यावद्दार्यते त्वया देव्या ॥ १॥

उन्मीलय मन्नयने त्वं मान्ये लक्ष्मि लोकमाताऽसि ।
चिन्मयसुभगावयवे कर्मकरः स्यामहं च तव कमितुः ॥ २॥

मन्मथजननि मनोज्ञेऽहंममतारहितयोगिकुलमहिते ।
दृङ्मूलमुन्मूलय मे सम्यक् श्रीकृष्णमूर्तिमीक्षेऽहम् ॥ ३॥

कल्मषखण्डनशीले रम्यकपोले सरोजमुखि सुतनो ।
अस्मानपद्महस्ते निर्मलमच्चक्षुरीक्षतां कृष्णम् ॥ ४॥

पूर्वं त्रिगुणमयी या सर्वं कार्यं करोति या पश्चात् ।
चार्वम्बुजाक्षवीक्षादक्षं मेऽक्षीह सा रमा कुर्यात् ॥ ५॥

वश्यं यस्याः सकलं दृश्यं यस्याः समस्तमपि विश्वम् ।
नश्यत्सु या न नश्येत्क्लिश्यत्सु च या कदाऽपि न क्लिश्येत् ॥ ६॥

ज्ञप्तेः करणानि षट् पञ्च कृतेर्हेतुभूतकरणानि ।
बुध्येयुर्यत्कृपया सिध्येद्वै तत्फलं च यत्कृपया ॥ ७॥

सा श्रीराश्रितरक्षादीक्षा दुष्कर्मशिक्षणे च पटुः ।
अश्वास्यं हि दिदृक्षोर्मेऽक्षणोस्तद्वीक्षणोत्सवं दद्यात् ॥ ८॥

सङ्गीतसाङ्गवेदा मङ्गलदेवीड मनोज्ञसर्वाङ्गी ।
भङ्गादिदोषरहिता तं गुणराशिं ममेक्षयेत्स्वपतिम् ॥ ९॥

शक्तिः संवित्स्फूर्तिर्मतिः प्रवृत्तिश्च यद्वशे नित्यम् ।
शक्ता त्वमेव सुजनोद्धर्त्री तन्मे प्रदर्शय स्वपतिम् ॥ १०॥

कुण्डलरत्नतिलकसन्नासामणिकण्ठसूत्रहारधरा ।
अङ्गदकङ्कणकाञ्चीकञ्चुकपीतवसनरशनाभा ॥ ११॥

सद्रत्नखचितकिङ्किणिमुद्राग्रैवेयनूपुरादिरुचा ।
भद्रोद्यदिन्दुवदना पद्मा मे मध्ववरदमीक्षयतु ॥ १२॥

या देवी निजरमणस्याङ्कगता पश्यति स्म तं सततम् ।
तस्याः स्तुतिमिति कृतवान्कृष्णदृगर्थी स वादिराजयतिः ॥ १३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

लक्ष्म्यार्यावृत्तं सम्पूर्णम्

वराहपञ्चकम्

प्रह्लादाह्लादहेतुं सकलगुणगणं सच्चिदानन्दमात्रं
सैंह्यासह्योग्रमूर्तिं सदभयमरिशङ्खौ रमां बिभ्रतं च ।
अंहस्संहारदक्षं विधिभवविहगेन्द्रेन्द्रचन्द्रादिवन्द्यं
रक्षोवक्षोविदारोल्लसदमलदृशं नौमि लक्ष्मीनृसिंहम् ॥ १॥

वामाङ्कस्थधराकराञ्जलिपुटप्रेमातिहृष्टान्तरं
सीमातीतगुणं फणीन्द्रफणगश्रीमान्यपादाम्बुजम् ।
कामाद्याकरचक्रशङ्खसुवरोद्दामाभयोद्यत्करं
सामादीड्यवराहरूपममलं हे मानसे संस्मर ॥ २॥

कोलाय लसदाकल्पजालाय वनमालिने ।
नीलाय निजभक्तौघपालाय हरये नमः ॥ ३॥

धात्रीं शुभगुणपात्रीमादायाशेषविबुधमादाय ।
शेषे तमिममदोषे धातुं हातुं च शङ्किनं शङ्के ॥ ४॥

नमोस्तु हरये युक्तिगिरये निर्जितारये ।
समस्तगुरवे कल्पतरवे परवेदिनाम् ॥ ५॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीवराहपञ्चकं सम्पूर्णम्

वराहहयवदनस्तोत्रम्

विदारितनिशाचरौ विशदवेदविद्याकरौ
प्रपन्नजनतावनौ प्रशिथिलीकृताश्वाननौ ।
मनोरमतमाकृती मदनमानिताधःकृती
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ १॥

वराभयदरारिभिर्वलयवल्गुहस्तद्युभिः
प्रबोधशुभपुस्तकप्रगुणशङ्खमाल्यैर्युतौ ।
हरिन्मणिमणिद्युती हरवितायमानस्तुती
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ २॥

मनोज्ञपदसारसौ महितजानुमध्योरसौ
त्रिरेखशुभकन्धरौ त्रिजगदादृतश्रीकरौ ।
विभूषणगणाश्रयौ विमलहारमालाश्रयौ
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ ३॥

रसामृतरसाङ्कितौ रसिकभक्तवर्गान्वितौ
प्रसादभरितेक्षणौ प्रमथमण्डलीशिक्षणौ ।
विरुद्धधुरसङ्गरौ महितशक्तितोऽभंगुरौ
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ ४॥

सुखानुभवविग्रहौ सुजनसङ्गरक्षाग्रहौ
विनोदजितदानवौ विलसदाकृतीं श्रीनवौ ।
भवाब्धिभयभञ्जनौ निजपदं सदा ध्यायिनां
वराहतुरगाननौ वनजलोचनौ नौम्यहम् ॥ ५॥

वराहतुरगास्ययोर्वरनुतिं निजैर्वश्ययोः
कृपानिलयनेत्रयोः कृपणभक्तहृन्मित्रयोः ।
यतिः शमलशान्तये यमिविमृग्यहृद्वान्तये
व्यधत्त विलसत्पदां विमलवादिराजाभिधः ॥ ६ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीवराहहयवदनस्तोत्रं सम्पूर्णम्

विभीषणहनुमत्संवादरूपवायुस्तुतिः

कस्मादस्मद्वनस्याङ्घ्रिपचयमुदयत्पुच्छवानच्छिनस्त्वं
रक्षो वृक्षोग्रहस्तः सुबहु किमवधीः किम्बलस्त्वं बताद्य ।
सिन्धुं चान्धूकरोषि प्रविशसि पृतनां निर्भयो द्विड्भटानां
चिन्तासन्तापकारी दशवदनपुरश्रीहरः को हरे त्वम् ॥ १॥

वायोरायोधनाग्रेसरसुभटशिरश्चित्ररत्नोपमस्य
प्रायो नायोध्यमस्य प्रियतमसुकुमारोऽहमारोहयोग्यः ।
श्रीशाक्रेशाङ्कधाम्नः कमलजवसतेश्चाहुरार्या हनूमा-
नित्याख्यां नात्ययोऽस्मत्कुलजमुंनिषु वो रंहसा वांऽहसा वा ॥ २॥

पारावारान्तरोद्यद्द्युमणिगणसमा भाति यद्धामसीमा
धीरो नारायणोऽयं रघुकुलमनघं कर्तुमुर्व्यां विहर्तुम् ।
भूमा भूमावुदेत्याखिलकविविनुतो रामनामास्ति धीमान्
सोऽयं श्रीमारुतस्य प्रियतमतनयं दासवृत्याऽनुशास्ति ॥ ३॥

रामारामां दिदृक्षोः करचरणचलद्बालतीलोरुघातैः
जातक्ष्माजातपातो न तु कृतिरियमल्पातिदर्पस्य मेऽलम् ।
वेगादागच्छतो मे जवभवपवनस्योदयोऽप्येनमासी-
द्धन्ताहं तादृशो नासुरज मम बलं राघवोऽमोघवीर्यः ॥ ४॥

रामाख्यामानितस्य प्रथितहरधनुर्भङ्गदोत्तुङ्गबाहोः
श्रुत्यन्तात्यन्तगीतागणितगुणगणस्येष्टसर्वेष्टदातुः ।
सोऽहं मोहान्धकारक्षपणदिनमणेर्दानवानीकिनीनां
मृत्योर्भृत्योऽस्मि तेन प्रहित इह खलानीतसीतार्तिशान्त्यै ॥ ५॥

पर्यग्गिर्यग्र्यगण्यं रविरथतुरगस्याग्रतो वाऽग्रयायी
विद्यां प्रद्योतनादध्यगमदुरुजवस्तन्मुखस्योन्मुखो यः ।
रामांघ्रिप्रेमशक्त्या त्रिभुवनजननस्थानसंस्थानशक्ते-
र्लङ्घा शङ्कास्पदा किं निगमनुतचरित्रस्य तस्याऽऽशुगस्य ॥ ६॥

अण्डोद्दण्डोदशोषेऽप्यतिकुशलतमः क्वेदमम्भोधिमम्भो-
लोकालोकाप्तमूर्तेर्जलनिधितरणं किं महन्निर्ममस्य ।

विश्वस्य श्वासयन्तुर्मम किमु खलविध्वंसने संशयः स्या-
द्देवाश्चैवोचुरुक्थं मम पितरमतश्चासमो दास एषः ॥ ७॥

धर्मं सम्मानयन्तं रघुपतिरवति प्रत्यहं शत्रुभावं
तस्मिन्योऽस्मिन्प्रदेशे रचयति तमिमं हन्ति तस्यानुगस्य ।
नित्यं कृत्यं तदेव ह्यघकरदशकण्ठोपकण्ठस्थदैत्या-
नित्थं हत्वाऽऽत्मभर्तुः प्रियकृदभवमुद्दामशौर्यौर्व्यवार्यः ॥ ८॥

द्रक्ष्यस्यक्षय्यवीर्योऽप्यरिभटपटुभिस्तैरबद्धैर्हि बद्धः
पुच्छस्वच्छाग्निनाऽहं कुनयतनयदत्तेन वित्तं समस्तम् ।
धक्ष्याम्यध्यक्षमेषां भवनवनमपि प्राज्ञ ते धाम धीमन्
त्यक्त्वा त्यक्तोग्रदैत्यप्रकृतिकृतविकारस्य धर्मानुगस्य ॥ ९॥

मुञ्च त्वं चाग्रजस्य प्रबलतमहरिद्वेषतो दोषभाजः
सेनामेनां विहीनां मनसि सुमनसां नायकं दायकं ते ।
भाग्यस्याग्र्यस्य नित्यं स्मर दितिजमतं धिक्कुरु न्यक्कुरुष्व
स्वीयस्याऽऽयासदात्रीं धियममलधिया धारयामुं दयालुम् ॥ १०॥

सेतुं यातुं कपीनामुरुतरजलधौ पुण्यहेतुं प्रहातुं
पापान्यापत्कराणि प्रथितसुयशसे शर्म दातुं च गातुः ।
वत्स्यत्यत्यस्यत्यथापि स्वकरधृतधनुर्मुक्तशाणोग्रबाण-
ज्वालाजालः स दैत्यव्यवनमवनकृद्राघवः श्लाघनीयः ॥ ११॥

भेत्ता मत्तासुरेन्द्रप्रतिभयशिरसां कुम्भकर्णोग्रकर्ण-
च्छेत्ता हर्ता च तस्य प्रियतमधरणीभारहारी स हारी ।
सीतामेतां समेत्य स्वचरणशरणान्देवभूदेवपूर्वान्
पृथ्वीं चेत्थं प्रतोष्य प्रविशति च निजां शत्रवयोध्यामयोध्याम् ॥ १२॥

तृष्णा कृष्णावतारेऽप्यघशमनतदंघ्र्यब्जसेवोत्सवे स्या-
द्भीमो भूत्वा तदाऽहं बकमदहरणो हन्मि किर्मीरदैत्यम् ।
सत्वोद्रिक्तं जरायाः सुतमथ गदयोन्मुद्य सद्वैर्यवीर्यः
शौर्योन्मत्तं च दुर्योधनमनु सबलं नाशयाम्याशयाऽन्धम् ॥ १३॥

ईशादेशेन सोऽहं पुनरपि धरणीं प्राप्य दुश्शास्त्रशस्त्रं
मध्वाख्योऽद्धा प्रदूष्य प्रगुणमथ करिष्यामि सूत्रस्य भाष्यम् ।
कृत्वा कृत्वाऽवतारान्सुरनिकरगुरुर्मुख्यवायुर्निजायुः
सार्थीकर्तुं मुकुन्दं परैचरति सदाऽरीन्हरन्व्याहरंश्च ॥ १४॥

विद्यां विद्यापतेर्यः पठै हनुमतः सोऽपि विद्यां समृद्धा-
मभ्येत्यभ्युन्नतिं च प्रतिदिनमुरुभक्तिं स्वयोग्यं च भाग्यम् ।
विद्वन्मध्ये प्रसिद्धिं बुधनुतकवितां वादिराजर्षिराजः
सद्यो यद्योगिवर्यो व्यतनुत तदियं सर्वकार्याणि कुर्यात् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

विभीषणहनुमत्संवादरूपा वायुस्तुतिः सम्पूर्णा

विष्णुस्तुतिः

बहुदुःखभरोदर्कस्तमसोग्रतमोऽधमः ।
नरको नरको वा तं मतिमानतिवर्तते ॥ १॥

नरकान्तकपादाब्जपरिचर्यापरान्नरान् ।
विना विनायकाद्यर्चापरोऽप्युच्चतरोऽरितः ॥ २॥

पतेत्तत्र न तत्राणं कुर्युस्ते पर्युपासिताः ।
पश्य दृश्य पदद्वन्द्वस्यार्थं न व्यर्थधीर्भव ॥ ३॥

असुरो हि सुरक्लेशकरो नरकनामकः ।
तस्य हन्ता सतां चिन्तासन्तापाद्यन्तकृन्न किम् ॥ ४॥

विशेषेण घ्नन्ति कार्यं विघ्नास्तेषामधीश्वरः ।
आरब्धशुभकार्याणां विरुद्धस्य हि नायकः ॥ ५॥

अजामिलो द्विजः पूर्वमतिचक्राम केन तान् ।
ससुराः कस्य भजकाः कुतो वा तत्र चक्रमुः ॥ ६॥

इति चिन्तय तेनापि सन्देहं छिन्धि मन्द ते ।
गङ्गासेतू पापभङ्गकरौ कोऽकुरुत प्रभुः ॥ ७॥

हयाननस्य वाक्छिष्यो नाभिपुत्रः पदार्चकः ।
गुरुर्हि तस्य भ्रूभङ्गः शिवाय स्यात्सतां सदा ॥ ८॥

वादिराजयतिप्रोक्तं स्तोत्रमेतत्पठन्सदा ।
वादे विजयमाप्नोति नाधोओ याति कदाचन ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

विष्णुस्तुतिः सम्पूर्णा

वेङ्कटेशमङ्गलाष्टकम्

श्रीक्षोण्यो रमणीयुगं सुरमणी पुत्रोऽपि वाणीपतिः
पौत्रश्चन्द्रशिरोमणिः फणिपतिः शय्या सुराः सेवकाः ।
ताक्ष्यो यस्य रथो महच्च भवनं ब्रह्माण्डमाद्यः पुमान्
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ १॥

यत्तेजोरविकोटिकोटिकिरणान् धिक्कृत्य जेजीयते
यस्य श्रीवदनाम्बुजस्य सुषमा राकेन्दुकोटीरपि ।
सौन्दर्यं च मनोभवानपि बहून् कान्तिश्च कादम्बिनीं
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ २॥

नानारत्नकिरीटकुण्डलमुखैर्भूषागणैर्भूषितः
श्रीमत्कौस्तुभरत्नभव्यहृदयः श्रीवत्ससल्लाञ्छनः ।
विद्युद्वर्णसुवर्णवस्त्ररुचिरो यः शङ्खचक्रादिभिः
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ३॥

यत्फाले मृगानाभिचारुतिलको नेत्रेऽब्जपत्रायते
कस्तूरीघनसारकेसरमिलच्छ्रीगन्धसारो द्रवैः ।
गन्धैर्लिप्ततनुः सुगन्धसुमनोमालाधरो यः प्रभुः
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ४॥

एतद्दिव्यपदं ममास्ति भुवि तत्सम्पश्यतेत्यादरा-
द्भक्तेभ्यस्स्वकरेण दर्शयति यद्दृष्ट्याऽतिसौख्यं गतः ।
एतद्भक्तिमतामियानपि भवाम्भोधिर्नदीति स्पृशन्
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ५॥

यः स्वामीसरसस्तटे विहरतो श्रीस्वामिनाम्नः सदा
सौवर्णालयमण्डितो विधिमुखैर्बर्हिमुखैः सेवितः ।
यः शत्रून्हनयन्निजानवति च श्रीभूवराहत्मकः
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ६॥

यो ब्रह्मादिसुरान् मुनींश्च मनुजान्ब्रह्मोत्सवायाऽऽगतान्
दृष्ट्वा हृष्टमना बभूव बहुशस्तैरर्चितस्संस्तुतः ।

तेभ्यो यः प्रददद्वरान् बहुविधान् लक्ष्मीनिवासो विभुः
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ७॥

यो देवो भुवि वर्तते कलियुगे वैकुण्ठलोकस्थितो
भक्तानां परिपालनाय सततं कारुण्यवारां निधिः ।
श्रीशेषाख्यमहीध्रमस्तकमणिर्भक्तैकचिन्तामणिः
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ८॥

शेषाद्रिप्रभुमङ्गलाष्टकमिदं तुष्टेन यस्येशितुः
प्रीत्यर्थं रचितं रमेशचरणद्वन्द्वैकनिष्ठावता ।
वैवाह्यादिशुभक्रियासु पठितं यैः साधु तेषामपि
श्रीमद्वेङ्कटभूधरेन्द्ररमणः कुर्याद्धरिर्मङ्गलम् ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीमद्वेङ्कटेशमङ्गलाष्टकं सम्पूर्णम्

व्यासवर्णनम्

व्यासायाप्रतिमेतिहासरचनोल्लासाय दुर्वादिनां
त्रासायासकराय सत्सु कृतविश्वासाय दोषद्विषे ।
भासा यामुनरम्यतोयसदृशायाऽऽसायमासेविने
दासायाभयदाय मध्वगुरुहृद्वासाय तुभ्यं नमः ॥ १॥

व्यासाय भवनाशाय श्रीशाय गुणराशये ।
हृद्याय शुद्धविद्याय मध्वाय च नमोनमः ॥ २॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

व्यासवर्णनं समाप्तम्

व्यासस्तुतिः (व्यासाष्टकम्)

श्रीशं विचित्रकवितारसपूरिताशं
श्रीशङ्करोरगखगेन्द्रहृदब्जवासम् ।
आशङ्कमानजनतृप्तिकरोक्तिहासं
व्यासं नतोऽस्मि हरितोपलसन्निकाशम् ॥ १॥

वेदान्तसूत्रपवनोद्धूतपञ्चवेदा-
मोदांशतोषितसुरर्षिनरादिभेदाम् ।
बोधाम्बुजातलसितां सरसीमगाधां
श्रीदां श्रितोऽस्मि शुकतातपदामखेदाम् ॥ २॥

द्वैपायनो जयति यन्निजशक्तिदीपः
पापाभिवर्धितकुबादितमिस्रतापः ।
पापाख्यदुर्भगदशाकृतितीव्रकोपः
पापाद्भुतौषधिरगे श्वसनांशरूपः ॥ ३॥

इन्द्रादिदैवतहृदाख्यचकोरचन्द्रा-
मन्दांशुकल्पशुभजल्पितपुष्पवृन्दः ।
वृन्दारकांघ्र्युपलतागुणरत्नसान्द्रो
मन्दाय मे फलतु कृष्णतरुः फलं द्राक् ॥ ४॥

माता हितेव परिरक्षति येन गीता
गीताग्र्यभारतपुराणकृताऽविगीता ।
वातांशमध्ववरदः सगिरो ममैताः
ख्याताः पराशरसुतो विदधातु धाता ॥ ५॥

पारं भवाख्यजलधेर्भुवनैकसारं
स्वैरं कृतोरुविधवेदपथःप्रचारम् ।
आरञ्जितामरजनं सुखचिच्छरीरं
धीरं स्मरामि हृदि सत्यवतीकुमारम् ॥ ६॥

भावाश्रितं यमनुसृत्य भजन्ति देवाः
सेवारताश्च मुनयः कवयो नृदेवाः ।

यो वासुदेववपुरस्य महानुभावां-
च्छ्रीबादरायणहरेर्न गृणीत को वा ॥ ७॥

ज्ञानं प्रदेहि भवदागमवार्ध्यधीनं
श्रीनन्दसूनुपदभक्तिनदीनिदानम् ।
आनन्दतीर्थवरदोक्षमहाध्वनीनं
दीनं बदर्यधिपते कुरु माममानम् ॥ ८॥

वासिष्ठवंशतिलकस्य हरेर्मनोज्ञं
दोषौघखण्डनविशारदमष्टकं ये ।
दासाः पठन्त्यनुदिनं भुवि वादिराज-
धीसम्भवं परिभवो न दिशासु तेषाम् ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

व्यासस्तुतिः सम्पूर्णम्

श्रीश्रीशगुणदर्पणस्तोत्रम्

या सुगन्धास्यनासादिनवद्वाराऽखिलेन या ।
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी ॥ १॥

या नित्यपुष्टा सर्वाङ्गैः सौन्दर्यादिगुणैरपि ।
"ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" (श्रीसूक्त ९) ॥ २॥

मातर्लक्ष्मि नमस्तुभयं माधवप्रियमानिनि ।
युवां विश्वस्य पितरावितरेतरयोगिनौ ॥ ३॥

"समना" (ब्र.सू. ४.२.७) किल मातस्त्वममुना ततयोगिनी ।
मम नाथेन देवश्च विमनाश्च न स त्वयि ॥ ४॥

त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः ।
त्वं मूलप्रकृतिर्देवी स चादिपुरुषः किल ॥ ५॥

यस्त्वामुरसि धत्तेऽम्ब कौस्तुभद्युतिभासिते ।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत् ॥ ६॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः ।
युवां युवानौ सततं युवयोर्न वयोऽधिकः ॥ ७॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा ।
पद्मद्वयधरा पद्मकोशोद्यत्स्तनशोभना ॥ ८॥

पद्महस्ता पद्मपादा पद्मनाभमनःप्रिया ।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी ॥ ९॥

अम्बां पीताम्बरश्रोणीं लम्बालकलसन्मुखीम् ।
बिम्बाधरोष्ठीं कस्तूरिजम्बालतिलकां भजे ॥ १०॥

रत्नोद्दीप्तसुमाङ्गल्यसूत्रवृत्तशिरोधराम् ।
कुण्डलप्रभयोद्दण्डगण्डमण्डलमण्डिताम् ॥ ११॥

कुचकञ्चुकसञ्चारिहारनिष्कमनोहराम् ।
काञ्चीकिङ्किणिमञ्जीरकङ्कणाद्यैरलङ्कृताम् ॥ १२ ॥

सुवर्णमण्डपे रत्नचित्रसिंहासनोत्तमे ।
नमामि हरिणा साकमिन्दिरां कृतमन्दिराम् ॥ १३ ॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुराङ्गनाः ।
यां पूजयन्ते सेवन्ते सा मां पातु रमा सदा ॥ १४ ॥

सर्वालङ्कारभरितौ सर्वज्ञौ सर्वसद्गुणौ ।
शर्वादिसर्वभक्तौघसर्वसर्वस्वदायकौ ॥ १५ ॥

सुमुखौ सुन्दरतरौ सुनासौ सुखचित्तनू ।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः ॥ १६ ॥

चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता ।
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेः प्रिया ॥ १७ ॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम् ।
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम् ॥ १८ ॥

वादिराजेन रचितं श्रीश्रीशगुणदर्पणम् ।
इमं स्तवं पठन्मर्त्यः श्रीमान्स्यान्नात्र संशयः ॥ १९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीश्रीशगुणदर्पणस्तोत्रं सम्पूर्णम्

सङ्कल्पपद्धतिः

विष्ण्वादेशे वर्तमानवेधसश्वरमार्धके ।
आयुषः कल्पके चैव सिताङ्गस्य किटेस्तथा ॥ १॥

मनोश्च सूर्यपुत्रस्य सन्धौ पादे कलेस्तथा ।
आद्ये वर्षे महापुण्ये भरतस्य महीपतेः ॥ २॥

जम्बुद्वीपे वत्सरे च वर्तमाने तथाऽयने ।
कृतौ मासे च पक्षे च तिथौ वारे च भे तथा ॥ ३॥

करणादियुते पुण्ये कालेऽस्मिन्प्रीतये हरेः ।
देवर्षिपितृतृप्त्यर्थं पापानां च निवृत्तये ॥ ४॥

अस्मिन्जलाशये विष्णोः पादपद्मं विचिन्तयन् ।
गङ्गां स्मरन्नहं स्नानं करिष्ये स्मृतिचोदितम् ॥ ५॥

अघौघविध्वंसकरस्य विष्णोस्तोषाय तेन प्रहितोऽहमस्मिन् ।
जले स्मरन्देवनदीं करोमि स्नानं स गोविन्दपदाभिधानम् ॥ ६॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

सङ्कल्पपद्धतिः सम्पूर्णा

सदाचारस्मृतिः

बुद्ध्वा ब्राह्मे मुहूर्ते स्मृतहरिरथ सङ्कीर्त्य तं नैॠताशां
गत्वा त्यक्त्वा पुरीषं स्मृतिविहितमृदा चीर्णशौचः प्रशोध्य ।
दन्तान्काष्ठेन कृत्वाऽऽचमनमथ सकृन्मग्न उत्थाय तिथ्या-
ध्युक्त्वा मृत्स्नां त्रिभागां दिनकरमनुनाऽऽमन्त्र्य पूर्वेण लिम्पेत् ॥ १॥

देहं कक्षाळिके चोदितमनुरपरेणांसजानुस्वपृष्ठं
नत्वा कृष्णं गुरूंश्च स्मृतहरिरखिलं तीर्थमावाह्य तोये ।
मग्नस्त्रिर्द्वादशाष्टाक्षरहरिमनुभिर्वार्युपस्पृश्य चाप्यं
सूक्तं जप्त्वाऽथ लिम्पेन्मृदमुदितमृतं चेति सूक्तं जपंस्त्रिः ॥ २॥

मग्नः पुंसूक्तमन्त्रैः शिवशिखरजलेनाभिषिच्याथ तीर्थं
पीत्वा सन्तर्प्य देवाद्यथ धृतवसनो वार्युपस्पृश्य पुण्ड्रम् ।
चक्रादीन्धारयित्वा श्रुतिविहितपथैः पूर्वसन्ध्यामुपास्य
स्मृत्वाऽर्कस्थं मुकुन्दं जपमथ विरचय्योदितेऽग्नौ जुहोति ॥ ३॥

स्नात्वा मध्याह्नकाले श्रुतिपथविदुपास्याथ सन्ध्यां गुरूक्तान्
मन्त्रान्जप्त्वा प्रतर्प्याच्युतमथ विहितब्रह्मयज्ञोऽर्चयित्वा ।
कृत्वोक्तं वैश्वदेवं स्वजनपरिवृतस्तत्प्रसादान्नभोजी
विद्यागोष्ठीप्रहृष्टः प्रतिदिवसमुपासीत सायं च सन्ध्याम् ॥ ४॥

ध्यात्वा ब्राह्मे मुहूर्ते हृदि नृहरिमभिष्टूय शास्त्रोक्तरीत्या
स्नात्वा चक्रोर्ध्वपुण्ड्राङ्किततनुरिनबिम्बस्थनारायणार्घ्यम् ।
दत्वा जप्त्वाऽथ हुत्वा स्वगुरुमनुजपब्रह्मयज्ञाच्युतार्चाः
कृत्वा हुत्वाऽथ भुक्त्वा कथितहरिकथोऽन्त्यामुपासीत सन्ध्याम् ॥ ५॥

कर्मादौ कर्ममध्ये तदुपरि च हरिं प्रेरकं संस्मरन्तः
तस्मिंस्तान्यर्पयन्तः श्रुतिपथविपरीतक्रिया वर्जयन्तः ।
एनं ये वादिराजाभिधयतिरचितं संग्रहं चिन्तयन्तः
कुर्युः कर्माणि तेषां वितरति सकलाभीष्टमिष्टो मुकुन्दः ॥ ६ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

सदाचारस्मृतिः सम्पूर्णा

सप्तरात्रोत्सवप्रकारः

देवोपदेवाः पितरो योगीन्द्राश्चक्रवर्तिनः ।
श्रीविष्णुपार्षदाः सर्वेऽप्यायान्तूत्सवरक्षकाः ॥ १॥

घ्नन्त्वन्तरायान्परितः कृन्तन्तु परिपन्थिनः ।
सन्तारयन्तु कर्माब्धि सन्तु सन्तोषदाः सदा ॥ २॥

हीनतां पूरयन्त्वेते हानिर्मास्त्वत्र काचन ।
ज्ञानानन्दमयः श्रीमान् श्रीनाथः प्रीयतां प्रभुः ॥ ३॥

सप्तरात्रोत्सवास्सर्वे सार्थकास्सन्तु सन्ततम् ।
तृप्तोऽस्तु लक्ष्मीरमणोऽस्माकं युष्मदनुग्रहात् ॥ ४॥

इन्द्रो महैश्वर्यदः स्यादस्मिन्नुत्सवकर्मणि ।
हुतं तु सुहुतं कुर्यात्सप्तजिह्वो हुताशनः ॥ ५॥

यमो नियमयेच्छत्रून्निरृतिर्हन्तु राक्षसान् ।
वरुणो वारयेद्विघ्नान्वायुर्ज्ञानप्रदोऽस्तु नः ॥ ६॥

धनदस्तु धनं भूरि दद्यादुत्सवपूर्तये ।
चन्द्रः शान्तकरो भूयादाह्लादयतु च प्रजाः ॥ ७॥

विद्रावयेदभद्राणि रुद्रो रौद्रपराक्रमः ।
अनन्तोऽनन्तफलदमिमं कुर्यान्महोत्सवम् ॥ ८॥

ब्रह्मा सर्वाणि कर्माणि सम्यङ्नीह करोतु नः ।
हरे भवत्प्रसादेन मोक्षाख्यफलसद्धये ॥ ९॥

अंकुरारोपणं पूर्वं किङ्करैः क्रियते तव ।
पार्षदाः पान्त्वहोरात्रमस्मिन्नुत्सवकर्मणि ॥ १०॥

विष्णोस्सर्वाणि भूतानि रक्षन्तु परितो दिशम् ।
विष्वक्सेनश्च विघ्नेशो विष्वक्स्वस्वगणैर्युतौ ॥ ११॥

निकृन्ततां चान्तरायं शान्तिं च कुरुतां सदा ।
पञ्चोत्सवाः पञ्चदिनेष्वथो विष्णुरथोत्सवः ॥ १२॥

पश्चादवभृथस्नानं द्रष्टृणां सन्तु तुष्टये ।
प्राग्रत्नमण्टपे कुर्यादुत्सवं श्रीपतेः सुधीः ॥ १३॥

पश्चात्सिंहोत्सवं कुर्याद्गजोत्सवमतः परम् ।
शेषोत्सवं ततः कुर्यात्ताक्ष्र्योत्सवमतः परम् ॥ १४॥

रथोत्सवं ततः कुर्यादलंकृत्य जनार्दनम्
सर्वोत्सवस्य श्रीभर्तुः सर्वोत्सवशिरोमणिः ॥ १५॥

रथोत्सवोऽयं दद्यान्नो मनोरथमहोत्सवम् ।
सप्तरात्रोत्सवान्यस्तु भक्त्या सेवेत मानवः ॥ १६॥

सप्तलोकोपरिस्थोऽस्य विष्णुर्हस्तगतो भवेत् ।
नमोऽस्तु विष्णवे तुभ्यं श्रियै चास्तु नमोनमः ॥ १७॥

नमोऽस्तु परिवारेभ्यो देवेभ्यः शिवमस्तु नः ।
तृपतस्त्रिविक्रमस्सर्वोत्तमस्सप्तभिरुत्सवैः ॥ १८॥

दद्यादायुः श्रियं भक्तिं मुक्तिं च भजतां सताम् ।
जनास्सुकृतिनस्सन्तु मनोऽस्तु मधुसूदने ॥ १९॥

भक्तिर्भवेद्भवो नश्येन्नश्येयुरघराशयः ।
पूर्वापूर्वक्रमज्ञत्यै सप्तरात्रमहर्निशम् ॥ २०॥

इमं स्तवं यस्तु पठेद्वादिराजसमीरितम् ।
दिनेदिने तस्य भवेदायुः श्रेयश्च मङ्गलम् ॥ २१॥

आहूय देवतास्सर्वा मन्त्रेणानेन मान्त्रिकः ।
आरभेतोत्सवं विष्णोर्भेरीताडनपूर्वकम् ॥ २२॥

वाचयित्वा स्वस्त्ययनं स्तोत्रमेदद्दिवौकसाम् ।
अंकुरारोपणत्पूर्वं पठेयुर्हरिकिङ्कराः ॥ २३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

सप्तरात्रोत्सवप्रकारः सम्पूर्णः

सहस्रारस्तुतिः

सहस्रार महाशूर रणधीर गिरा स्तुतिम् ।
षट्कोण रिपुहृद्बाण सन्त्राण करवाणि ते ॥ १॥

यस्त्वक्तस्तप्तसुतनुः सोऽत्ति मुक्तिफलं किल ।
नातप्ततनुरित्यस्तौत् ख्याता वाक् त्वां महौजस ॥ २॥

हतवक्रद्विषच्चक्र हरिचक्र नमोऽस्तु ते ।
प्रकृतिघ्नासतां विघ्न त्वमभग्नपराक्रम ॥ ३॥

कराग्रे भ्रमणं विष्णोर्यदा ते चक्र जायते ।
तदा द्विधाऽपि भ्रमणं दृश्यतेऽन्तर्बहिर्द्विषाम् ॥ ४॥

वरादवध्यदैत्यौघशिरःखण्डनचातुरी ।
हरेरायुध ते दृष्टा न दृष्टा या हरायुधे ॥ ५॥

अवार्यवीर्यस्य हरेः कार्येषु त्वं धुरन्धरः ।
असाध्यसाधको राट् ते त्वं चासाध्यस्य साधकः ॥ ६॥

ये छिन्नकन्धराश्चक्र दैतेयास्तव धारया ।
त एव चित्रमनयंस्तथाऽप्यच्छिन्नकन्धराम् ॥ ७॥

अरे तवाग्रे नृहरेररिः कोऽपि न जीवति ।
नेमे तवाग्रे कामाद्या नेमे जीवन्त्वहो द्विषः ॥ ८॥

पवित्रपवित्वत्राहि पवित्रीकुरु चाश्रितान् ।
चरण श्रीशचरणौ स्थिरीकुरु मनस्सु नः ॥ ९॥

यस्त्वं दुर्वाससः पृष्ठनिष्ठो दृष्टोऽखिलैः सुरैः ।
अस्तावयः स्वभर्तारं स त्वं स्तावय मद्गिरा ॥ १०॥

भूस्थदुर्दर्शनं सर्वं धिक्कुरुष्व सुदर्शन ।
वायोः सुदर्शनं सर्वस्यायोध्यं कुरु ते नमः ॥ ११॥

सुष्ठ दर्शय लक्ष्मीशतत्वं सूर्यायुतप्रभ ।
द्वारं नः कुरु हर्यास्यै कृतद्वार तमस्यपि ॥ १२॥

पद्यानि निरवद्यानि वादिराजाभिधः सुधीः ।
द्वादश द्वादशारस्य चक्रस्य स्तुतयेऽकृत ॥ १३॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

सहस्रारस्तुतिः सम्पूर्णा

स्वाप्नपद्यम्

सुदर्शनपदाम्भोजसमीपस्थोऽहमन्वहम् ।
गृहीतमस्तकस्तु स्यां भयभञ्जनपाणिना ॥ १ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

स्वाप्नपद्यं सम्पूर्णम्

हयग्रीवस्तोत्रम्

हयग्रीवं चिदानन्दविग्रहं सदनुग्रहम् ।
दशग्रीवच्छिदं शापान् मणिग्रीव विमोचनम् ।
तयीग्रीवनमश्चान्द्रसान्द्रकान्ति समांशुमन् ॥ १॥

स्वामिन् सघृणकाप्यम्बा किं बालकममुञ्चत ।
पालय श्रीपते तस्मादस्मान्सेवकसेवकान् ॥ २॥

ईश तेऽनीश जीवत्वं स त्वं वक्ति न युक्तिमान् ।
अश्वो भूत्वाऽपि यो मर्त्यो मर्त्यो वाऽश्वो जगत्रये ॥ ३॥

हयास्य पश्य भृत्यन्ते हन्ते मे भूतराक्षसाः ।
जिघांसन्त्यास्त चक्रस्त्वं स त्वं विस्तार्य रक्ष माम् ॥ ४॥

यमोऽपि ते भटस्त्वं च पञ्चरूपो भवान्प्रभुः ।
आज्ञापयसु राजाऽसौ दासाग्र्यं मयि मोचयेत् ॥ ५॥

अनन्तगुणसंपूर्ण धूर्नकाऽप्यत्र मे प्रिया ।
तव पादाब्जसेवैव जैवबन्धविमोचिनी ॥ ६॥

सुरम्य सुखचिद्रूप धूपदीपार्चनादिकम् ।
तवप्रियं सदा कुर्या पुर्या वा पर्वतेऽपि वा ॥ ७॥

विद्यां देहि विवेकं च शं च सर्वत्र देहि मे ।
श्रद्धां देहि तथा पाहि मा हिनस्ति यथा परः ॥ ८॥

ससुरासुरगन्धर्वपूर्वसर्व जगत्पते ।
शरणं भव वाणीशवीशभोगीशसेवित ॥ ९॥

हयानन हरक्लेशं लेशं दर्शयन प्रभो ।
भवन्मुखांबुजे नृत्यच्छृत्यन्ताख्य वधूहृदाम् ॥ १०॥

वादिराजाख्ययतिना सादरं रचितां स्तुतिम् ।
श्रीधराङ्घ्रियुगे भक्तिं साधयन् सर्वदा पठेत् ॥ ११॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

हयग्रीवस्तोत्रं संपूर्णम्

हयग्रीवदण्डकम्

जयजय तुरङ्गस्य नस्तो मुखान्निर्गतानन्तवेदादिविद्याप्रबोधीकृताम्भोजसम्भूत
हेषारवोन्निर्जिताशेषदैतेय लक्ष्म्याऽमृतेनानिशं सिच्यमानाङ्ग
राकेन्दुकोटिप्रतीकाशदेहप्रभाभासिताब्जातगर्भाण्डबाह्यान्तरानम्रधात्रीररुद्रेन्द्र-
मुख्यामरव्रातकोटीरमाणिक्यकान्तिच्छटाराजितांघ्रे शरच्चन्द्र हृन्मन्दिर-
ध्वान्तराशेः प्रपन्नामरानोकस्त्वं पुरा देव नारायणाख्येन रूपेण लोकं स्वगर्भे
निधाय श्रियो बाहुयुग्मान्तरे संस्थितस्सन् सिसृक्षुस्त्वमादौ विधातारमासृज्य
तत्सत्रयागे हयग्रीवरूपं समास्थाय दैत्याधमं लोकशत्रुं मधुं कैटभाख्यं
च चक्रेण हत्वा पुनर्लोकसंरक्षणार्थं ऋषाद्यावतारैः महादैत्य-
सङ्घांश्च निर्मथ्य लोकान् सदा पासि भो देव यस्त्वां मनुष्योत्तमो
दुग्धपाथोधिमध्यस्थ सुश्वेतनामोल्लसद्द्वीपमध्ये सुसन्तानवृक्षावलीवेष्टिते
सन्मणिस्तम्भयुक्ते महामण्टपे तत्र पङ्केरुहे कर्णिकायां सुधासूतिबिम्बे
महायोगपीठे निषण्णं नमद्देवतामौलिमन्दारमालास्रवन्माकरन्दद्रवक्षालिते-
नांकुशच्छत्रपाठीनवज्राम्बुजातोर्ध्वरेखाङ्कितेनांघ्रियुग्मेन संराजितं
श्वेतकूर्माभगुल्फं लसज्जानुयुग्मं दिशादन्तिशुण्डोपमोरुद्वयं
दुग्धसिन्ध्वन्तरीयोपमेनाच्छकौशेयवस्त्राभिरामेण भास्वन्नितम्बेन युक्तं
वियद्व्याहिनीवर्तुलावर्तगम्भीरनाभीसरस्तीरसञ्जातरोमावलीमण्डितेनोदरेणाञ्चितं
श्रीनिवासायतोरुस्थलं शेषभोगाभहस्तैश्चतुर्भिस्सदा शङ्खमुक्ताक्षमाला-
लसत्पुस्तकोद्बोधयुक्तारविन्दानि समयग् दधानं रणद्भृङ्गसंसक्तसम्फुल्ल-
मन्दारमालावलीलग्नसत्कण्ठशोभाभिरामं शशाङ्कांशुसङ्काशसत्केसरव्रात-
केशावलीमण्डितं दन्तकान्तिच्छटाभासिताशावकाशं दलत्पद्मपत्रायताक्षं
स्फुरद्दक्षिणावर्तशङ्खप्रतीकाशकर्णं लसन्मस्तकं दिव्यमुक्तामयोदारकोटीर-
केयूरहारावलीमेखलाद्यखिलैर्भूषणैर्भूषितं चन्दनाचर्चिताशेषगात्रं सदा
मूर्तिमद्वेदशास्त्रेतिहासादिविद्यावलीसेवितं श्रीसतीचञ्चलापाङ्गनीराजितं
ब्रह्मरुद्रेन्द्रादिवन्द्यं सन्मनःपङ्कजे चिन्तयन् देव बाह्ये हरिद्गोमयालिप्तके
रङ्गवल्लीसुशोभाञ्चिते स्थण्डले श्वेतकौशेयवस्त्रावृते मालतीमल्लिकादि-
प्रसूनावलीमण्डिते चक्रपद्मादिसन्मण्डलोपेतपीठे यथा याज्ञिका बाह्यवह्नौ
निजान्तस्स्थमग्निं समाकृष्य मन्त्राक्षतैः स्थापयित्वाऽऽवर्जयन्ति स्म
तद्वद्बहिर्योगमार्गेण हृत्पद्ममध्यस्थमीशं स्वबिम्बे प्रतिष्ठाप्य नित्यं
त्वदष्टाक्षरेणोक्तमार्गेण सम्पूजयन् वर्तते देव यद्वा सुवर्णादिसल्लोहपत्रेषु वा
भूर्जपत्रेषु वा पट्टवस्त्रेषु वा वह्निपूर्बाणदिग्राजदन्तारकेषु क्रमादेकवर्णं
त्वदीयं लिखित्वाऽथ पञ्चाक्षरं गारुडं चाष्टवर्णं स्वरानुष्टुभं सम्यगालिख्य
तद्वद्बहिर्योगमार्गेऽशरीरा क्षरैः कादिक्षान्तैः क्रमाद्वेष्टयित्वा ततो

व्योमयुग्मं धरामण्डले दिक्पतीनां च बीजानि संलिख्य त्वद्बिम्बवद्गन्धपुष्पो-
पहारादिभिर्भक्तिभावेन सम्पूज्य सन्मन्त्रसिद्धो भवेत्तस्य वक्त्रे स्थिरा शारदा
तस्य भक्तिर्भवेच्छाश्वती तस्य विद्याः स्फुरन्त्यश्रुतप्रज्ञया तस्य
पुत्रादिवृद्धिर्भवेत्तस्य वाञ्छा लभन्तेऽखिला देव यद्वा मनोर्जञ्झपूको
भ्रुवोरन्तरे त्वां समस्तागमानुद्गिरन्तं समाचिन्त्य तत्रैव दीर्घान्वितं बिन्दुयुक्तं
चतुर्थोष्मरूपं मनुं स्वान्वितं सम्यगुच्चार्य सायं मुखे मुक्तनामासने
सन्निवेश्यानिलं बेळया पूरयन् केवले कुम्भके संस्थितस्सन् तदूर्ध्वीकृते
स्वस्य जिह्वाग्रभागेन रन्ध्रं निरुध्योद्गतं सोमनीतं पिबेत्प्रत्यहं तस्य गीर्वाणवाणी
वशा तस्य पातञ्जलं स्याज्जलं तस्य भाट्टं गरट्टोद्धपिष्टोपमं तस्य तर्कस्तु
पाणिस्थकर्कन्धुका तस्य वैय्यासिकी गीर्मरुन्मेचकी सैष वादेषु पञ्चाननो देव यो वा
घृतं ब्राह्मिकापाचितं तथा कंगुणीबीजजालानि वाचाऽभिमन्त्र्य त्वदीयेन मन्त्रेण
नित्यं पिबेत्खादयेत्तस्य वक्त्रे कवित्वं सुधासम्मितं सम्भवेत्तस्य बुद्धिर्बहु-
ग्रन्थसन्धारिणी स्यात्प्रभो देव यत्ते पदाम्भोजशौचोदकं शूलपाणेः शिरोभूषणं
यस्य नाभ्युद्भवो लोकनिर्माणकृत् पद्मभूः यस्य पौत्रो हरः सर्वसंहारकृत्
यस्य निश्श्वासरूपाः समस्तागमाः यस्य पत्नीकटाक्षस्य लेशो विधीशेन्द्रमुख्यामरस्थानदो
यस्य तल्पं सशैलाटवीसिन्धुविश्वम्भराधारकः शेषभोगीश्वरो यस्य वाहोत्तमः
सर्ववेदाभिमानी खगाधीश्वरो यस्य वक्त्राग्निमध्ये सुरारातिसङ्घाः पतङ्गा बभूवुः
स्वयं यस्य दिव्याद्भुयो भक्तिभाजां नृणां तीर्थकोट्युत्थपुण्याधिको यस्य विज्ञान-
भक्त्याख्यसद्द्रव्यसम्पादकानां भवेदक्षयानन्दभोगः प्रभो देव तं त्वामहं
सच्चिदानन्दमूर्तिं जगज्जन्मसंरक्षणाज्ञानसंहारबन्धादिहेतुं निरस्ताधिकं निस्समं
सद्गुणाम्भोनिधिं नित्यमुक्तं निजानन्दतृप्तं विभुं निर्गताशेषदोषं निरीशं
स्वरोमावलीकूपसंस्थानगर्भाण्डकोटिव्रजं मुक्तवागीशपक्षीशदेवेशकन्दर्पसूर्यादि-
मुख्यामरैः सेवितं श्रीकराम्भोजरत्नोर्मिकादीधितिस्तोमशोणीकृतांघ्रिद्वयं
भक्तलोकार्जितानेकजन्माद्यशुष्काटवीपावकं सर्वदेवैकवन्द्यं लसद्भक्तिगम्यं
महायोगिहृन्मन्दिरं सन्ततानन्तभोगासनं देवदेवं प्रणम्य प्रभो याचये ।

साधुनिन्दात्मशंसाश्रुतग्रन्थदुश्शास्त्रवेत्तृत्वदुष्टात्मसेवाद्यनन्तापराधालयं
नित्यकर्माद्यनुष्ठानदूरं दुराचारिणं ज्ञानहीनं सदा क्रोधलोभाद्यमित्रान्वितं
स्वोत्तमाचार्यसेवावभिज्ञं कृतघ्नं नृशंसं महाघौघसिन्धौ निमग्नं
कृपाम्भोनिधे पाहि निश्चञ्चलां ते पदाम्भोजभक्तिं प्रभो देहि सुज्ञानवन्तं
कुरुष्वाशु मां यत्ते मनोज्ञं लसत्पुण्डरीकायताक्षं प्रसन्नाननं चारुमन्दस्मितं
शोभमानं शशाङ्कप्रभं दिव्यसद्गन्धभूषाम्बरालंकृतं श्रीसखं
सच्चिदानन्दमूर्तिं सदा मन्मनःपङ्कजान्ते स्थिरं स्थापयानन्तशक्ते जय वाजिवक्त्र
प्रभो जय सिन्धुकन्यापते जय देवचूडामणे जयानन्तशक्ते जयानन्दसिन्धो

जयागाधबोध प्रभो श्रीरमानाथ लोकैकनाथा रमेयाच्युतानन्त गोविन्द तुभ्यं नमस्ते नमस्ते नमस्ते नमः पाहि मां पाहि ।

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीहयग्रीवदण्डकं सम्पूर्णम्

हयग्रीवध्यानप्रकरणम्

सदा तव ध्येयतया हृदब्जे स्थितमच्युतम् ।
चिद्रूपभद्रावयवं चित्रभूषणभूषितम् ॥ १॥

सश्रीकं सपरीवारं सर्वज्ञं सर्वसाक्षिणम् ।
आवाह्य प्रतिमामध्ये ध्यायस्व नृतुरङ्गमम् ॥ २॥

करस्थमुद्राशङ्खाक्षपुस्तकं रम्यहस्तकम् ।
चन्द्राभं चन्द्रबिम्बस्थं चन्दनोक्षितवक्षसम् ॥ ३॥

चारुप्रसन्नवदनं चलत्कुन्तलसन्ततिम् ।
सुकर्णगण्डभ्रूयुग्मं सुनासोष्ठं शुचिस्मितम् ॥ ४॥

सुधारसार्द्रसर्वाङ्गं शोकमोचनलोचनम् ।
श्रीवत्सकौस्तुभधरं श्रितभक्तधुरन्धरम् ॥ ५॥

वनमालावैजयन्तीकन्धरं लोकसुन्दरम् ।
कृशमध्यं विशालोरःस्थलं पीनचतुर्भुजम् ॥ ६॥

दुष्टानिष्टदशिष्टेष्टपुष्टबाहुचतुष्टयम् ।
वृत्तदीर्घचतुर्हस्तैः श्रुत्यर्थचतुरर्थदम् ॥ ७॥

कराख्याम्भोजसम्भूतदलोपमशुभाङ्गुलम् ।
अश्वग्रीवं दृष्यपार्श्वं लक्ष्यकक्ष्यस्तनद्वयम् ॥ ८॥

मनोज्ञपृष्ठप्रभया तृणीकृतशशिद्युतिम् ।
तनूदरं निम्ननाभिं मनोहरवलित्रयम् ॥ ९॥

लसद्रोमलताभासा वशीकृतरमादृशम् ।
बृहत्कटितटद्वन्द्वमप्रतिद्वन्द्वमव्ययम् ॥ १०॥

वर्तुलोरुं वृत्तजानुजङ्घाङ्गुलिनखावलिम् ।
अतिरक्तांघ्रियुगलतनुकोमलपल्लवम् ॥ ११॥

ध्वजवज्रपताकाब्जाङ्कुशरेखाभिरञ्चितम् ।
रक्तास्याब्जं रक्तपद्मसमश्रीमत्पदद्वयम् ॥ १२॥

चतुर्हस्तारुणतलं चतुर्वेदप्रवर्तकम् ।
चतूरूपश्रिया जुष्टं चतुर्वर्णाश्रमप्रियम् ॥ १३॥

चतुर्मूर्तिधरं चित्रं चतुर्युगनियामकम् ।
चतुर्विधानां मुक्तानां चतुर्विधसुखप्रदम् ॥ १४॥

चतुरास्यगुरुं धीरं चतुरं श्रीहयाननम् ।
करुणार्द्रकटाक्षाभ्यां कलिकल्मषखण्डनम् ॥ १५॥

खलौघदण्डनं शान्तं कमनीयतमं स्मर ।
चित्ररत्नोच्चमकुटं रत्नग्रैवेयरञ्चितम् ॥ १६॥

रत्नोद्यत्तिलकं रत्नकुण्डलद्वयमण्डितम् ।
सद्रत्नभुजकीर्तिभ्यां हृद्यांसद्वयमद्वयम् ॥ १७॥

रत्नहारसरैर्युक्तं रत्नयज्ञोपवीतिनम् ।
रत्नोज्ज्वलोत्तरीयं च रत्नमध्यविभूषितम् ॥ १८॥

रमणीयं रत्नकाञ्च्या रत्नकिङ्किणिराजितम् ।
रत्नोद्यत्कटिसूत्रेण बद्धविद्युत्प्रभाम्बरम् ॥ १९॥

रत्नाङ्गुलीयकं रत्नकङ्कणाङ्गदभास्वरम् ।
विचित्ररत्नोल्लसितवीरतोचितभूषणम् ॥ २०॥

नवरत्नमयोत्तुङ्गरणत्कनकनूपुरम् ।
स्फुरद्रत्नचयोद्भासिक्वणत्पौरुटकिङ्किणिम् ॥ २१॥

रत्नमुद्राङ्गुलीयैश्च दीप्तपादद्वयाङ्गुलिम् ।
तुलसीकुन्दमन्दारकुसुमैश्च सदाऽर्चितम् ॥ २२॥

रत्नमण्टपमध्यस्थं रत्नपद्मोपरि स्थितम् ।
रत्नोल्लसत्फणश्रेण्या छत्रायितफणीश्वरम् ॥ २३॥

चित्ररत्नमयच्छत्रचामरादैश्च सत्कृतम् ।
सप्तावरणदेवैश्च सहितं ते हितं स्मर ॥ २४॥

चतुर्दिक्षु चतुर्द्वारगतैश्चण्डजयादिभिः ।
द्वाःस्थैश्चक्रगदाहस्तैर्जुष्टमिष्टकरं स्मर ॥ २५॥

मध्वहृत्पद्ममध्यस्थं हृद्यदं बुद्धिशुद्धिदम् ।
सद्यो विजयदं सिद्धसाध्याराध्यपदं स्मर ॥ २६॥

तत्त्वानां मातृकाणां च वर्णानां चैव देवताः ।
शास्त्रोक्तवर्त्मना विष्णोरङ्गेष्वर्पय सादरम् ॥ २७॥

पञ्चाङ्गं वा षडङ्गं वा न्यासं कृत्वा पुनर्हरेः ।
संस्मृत्य चरणौ मन्त्राञ्जप प्रणवपूर्वकान् ॥ २८॥

पञ्चामृतैः शुद्धजलैः कलशस्थोदकैरपि ।
मन्त्रपूतैः स्नापयित्वा सपीठावरणाम्बरम् ॥ २९॥

अर्घ्यादैरुपचारैश्च तोषयित्वा जनार्दनम् ।
तुलसीमञ्जरीभिश्च पुष्पैश्च विविधैरपि ॥ ३०॥

आराध्य धूपदीपौ च दत्वा स्तुत्वा पुनर्हरिम् ।
सरसैः फलपक्वैश्च भक्ष्यभोज्यरसायनैः ॥ ३१॥

ससितैर्घृतसिक्तैश्च पायसैर्विविधैरपि ।
दध्योदनेन चित्रान्नैस्तर्पयाऽवरणान्वितम् ॥ ३२॥

दयार्द्रहृदयं भक्तवत्सलं पुरुषोत्तमम् ।
पुनर्गण्डूषाचमनमुखवस्त्रादिकं दिश ॥ ३३॥

कर्पूरखण्डसहितं ताम्बूलं च निवेदय ।
पुनर्धूपेन दीपेन चित्रैरारार्तिकैरपि ॥ ३४॥

मन्त्रपुष्पैः स्तवैर्गीतैर्नृत्यवादित्रपूर्वकैः ।
अर्चयित्वा नमस्कृत्य कुरु चान्ते प्रदक्षिणम् ॥ ३५॥

श्रिया च धरया चैव स्वरूपावरणैरपि ।

अनन्तब्रह्मवाय्वीशवीशैः शक्रादिकैः सुरैः ॥ ३६ ॥

कृताञ्जलिपुटैर्नित्यं परिवारतया स्थितैः ।
पीठदेवैश्च सहितमेवं कालत्रयेऽर्चय ॥ ३७ ॥

भक्तियुक्तिस्फूर्तिशक्तिकीर्त्यनार्तिधृतिस्मृतीः ।
विरक्तिभक्तिमुक्तीश्च सुखव्यक्तीश्च याचय ॥ ३८ ॥

कर्तारं चैव धर्तारं प्रवक्तारं हयाननम् ।
ध्यातुं गातुं श्रमं जेतुं वादिराजोऽकृत स्तवम् ॥ ३९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

हयग्रीवध्यानप्रकरणम् समाप्तम्

हयग्रीवपञ्चकम्

लसाशय रसाशया परिसरन्तमक्षैर्हयैः
कुमेधसि कुमेधसि स्थिरतया निबद्धं सदा ।
खरस्वनखरस्वनैः परपुमर्थनोत्थैर्मितं
मनोरथमनोरथप्रतिनिधिं बिभर्मि प्रभो ॥ १॥

महं बहु महं बहु प्रकटमेव कृत्वा रहः
समेत्य हि समेत्य हि त्विडुदरं पिबाम्यच्युत ।
नरप्रिय नरप्रियं विरचयामि नूनं प्रभो
न ते स्थिरनते स्थिरप्रियमहो कदाऽप्याचरम् ॥ २॥

नमस्तव नमस्तवप्रियपुरघ्न दीनस्य मे
मनोहर मनोहराच्युतपदाम्बुजे स्थापय ।
हृषीकप हृषीकपालक मुकुन्द तैस्सन्नतैः
सहाखिलसहाखिलावप न मुञ्च मामाश्रितम् ॥ ३॥

मतां स्तुतिमतां स्तुतिं तुरगवक्त्र तुभ्यं नमो
दिशान्तर दिशान्तरस्फुरितचारुमूर्तेस्तव ।
सुदामवसुदामवत्परिसरद्धियो मेऽन्वहं
पदाम्बुज पदाम्बुजाभ्युदयपूतलोकत्रय ॥ ४॥

विषोपमविषोपमैर्विषयराशिभिर्वञ्चितं
सदासुरसदासुरप्रियजिघृक्षयान्धायितम् ।
भवज्जनभवज्जनान्तरकृतार्तिमूलघ्न मां
हयानन हयाननार्दन न मुञ्च भक्तं तव ॥ ५॥

हयास्यनुतिपञ्चकं भवजवेदनावञ्चकं
विरक्तिमतिशाधकं विमलवृत्तिसंशोधकम् ।
दशप्रमतिसन्नतिस्तुतिरतेन कर्मन्दिना
मुकुन्दमननार्थिना व्यरचि वादिराजेन हि ॥ ६ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

हयग्रीवपञ्चकं समाप्तम्

हयग्रीवस्तुतिः

लसदास्य हयग्रीव लसदोष्ठद्वयारुण ।
लसद्दन्तावलीशोभ हयग्रीव लसत्स्मित ॥ १॥

लसत्फाल हयग्रीव लसत्कुन्तलमस्तक ।
लसत्कर्ण हयग्रीव लसन्नयनपङ्कज ॥ २॥

लसद्वीक्ष हयग्रीव लसद्भ्रूमण्डलद्वय ।
लसद्ग्रीव हयग्रीव लसद्भस्त लसद्भुज ॥ ३॥

लसत्पार्श्व लसत्पृष्ठ कक्षांसयुग सुन्दर ।
हयग्रीव लसद्वक्षःस्तनमध्य वलित्रय ॥ ४॥

हयग्रीव लसत्कुक्षे लसद्रोमलताञ्चित ।
हयग्रीव लसन्नाभे लसत्कटियुगान्तर ॥ ५॥

लसदूरो हयग्रीव लसज्जानुयुगप्रभ ।
हयग्रीव लसज्जङ्घायुग्म पादाम्बुजद्वय ॥ ६॥

हयग्रीव लसत्पादतलरेखारुणद्युते ।
लसन्नखांगुलीशोभ हयग्रीवातिसुन्दर ॥ ७॥

लसत्किरीटकेयूरकङ्कणाङ्गदकुण्डल ।
हयग्रीव लसद्रत्नहारकौस्तुभमण्डन ॥ ८॥

हयग्रीव लसन्मध्य लसच्चन्दनचर्चित ।
लसद्रत्नमयाकल्प श्रीवत्सकृतभूषण ॥ ९॥

हयग्रीव लसत्काञ्चीरत्नकिङ्किणिमेखल ।
हयग्रीव लसद्वस्त्र मणिनूपुरमण्डित ॥ १०॥

हयग्रीवेन्दुबिम्बस्थ लसच्छङ्खाक्षपुस्तक ।
लसन्मुद्र हयग्रीव लसदिन्दुसमद्युते ॥ ११॥

हयग्रीव रमाहस्तरत्नकुम्भसृतामृत ।
हयग्रीव समानश्रीचतूरूपोप्रसेवित ॥ १२ ॥

हयग्रीव सुरश्रेष्ठ हयग्रीव सुरप्रिय ।
हयग्रीव सुराराध्य जय शिष्टजयेष्टद ॥ १३ ॥

हयग्रीव महावीर्य हयग्रीव महाबल ।
हयग्रीव महाधैर्य जय दुष्टविनष्टिद ॥ १४ ॥

भयं मृत्युं क्षयं व्यर्थव्ययं नानामयं च मे ।
हरे संहर दैत्यारे हरे नरहरे यथा ॥ १५ ॥

भक्तिं शक्तिं विरक्तिं च भुक्तिं मुक्तिं च युक्तिद ।
हरे मे देहि दैत्यारे हरे नरहरे यथा ॥ १६ ॥

सदा सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये ।
हयग्रीवस्तुतिः पाद्या वादिराजयतीरिता ॥ १७ ॥

चिन्तामणिर्हयग्रीवो वशे यस्य निषेवितः ।
सोऽपि सर्वार्थदो नॄणां किमुतासौ हयाननः ॥ १८ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

हयग्रीवस्तुतिः सम्पूर्णा

हयग्रीवसम्पदास्तोत्रम्

हयग्रीव हयग्रीव हयग्रीवेति वादिनम् ।
नरं मुञ्चन्ति पापानि दरिद्रमिव योषितः ॥ १॥

हयग्रीव हयग्रीव हयग्रीवेति यो वदेत् ।
तस्य निस्सरते वाणी जह्नुकन्याप्रवाहवत् ॥ २॥

हयग्रीव हयग्रीव हयग्रीवेति यो ध्वनिः ।
विशोभते स वैकुण्ठकवाटोद्घातनक्षमः ॥ ३॥

श्लोकत्रयमिदं पुण्यं हयग्रीवपदाङ्कितम् ।
वादिराजयतिप्रोक्तं पठतां सम्पदां पदम् ॥ ४॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

हयग्रीवसम्पदास्तोस्त्रम् सम्पूर्णम्

हयवदनाष्टकम्

दासस्य मे शिरसि हस्तसहस्रपत्रं
श्रीशार्पयेश वरदेश्वर वाजिवक्त्र ।
व्यासादिमूर्तिशतशोभित मे प्रसीद
पाशं विखण्डय भवाभिधमम्बुजाक्ष ॥ १॥

दासस्य मे शिरसि पादलसत्सरोजं
श्रीशार्पयाऽऽशु निजभूषणभूषणं ते ।
आशां विनाशय भवत्स्मरणप्रतीपान्
दोषांश्च दूरय भवाव्यय मेऽन्तरङ्गे ॥ २॥

संसारदावशिखया परितप्यमानः
संसेवकस्तव तुरङ्गमतुङ्गवक्त्र ।
संशुद्धमध्वहृदयाब्जगराजहंस
कं साधयामि शरणं वरदं विना त्वाम् ॥ ३॥

पञ्चात्मकश्रुतिनिगूहकदानवेन्द्र-
पञ्चत्वदायक रमाञ्चितपादपद्म ।
सिञ्च त्वदङ्गपरिपावितपापभेद-
चुंच्वंघ्रिपद्मपरिलम्बिसुधाप्रवाहैः ॥ ४॥

नाहं वृणोमि तव पादद्विनेशसेवां
मोहान्धकारनिकरक्षयदां विनाऽन्यत्
व्यूहं सतां समवलम्ब्य भवच्चरित्र-
व्याहारतृप्तकरणं कुरु किं बहूक्तया ॥ ५॥

किं बन्धनैः कथय बन्धुजनैर्मुरारे
किं भारभूतकटकादिविभूषणैर्वा ।
अम्भस्सु मग्नकरणस्य भवाम्बुराशेः
किं भङ्गशीलधनभूभवनाद्युपायैः ॥ ६॥

उत्फुल्लपद्मदलनेत्र तुरङ्गवक्त्र
रत्नौघचित्रतिलकारुणमंजुलोष्ठ ।

विस्तीर्णवक्षसि विराजितभूरिहार
वृत्तातिदीर्घकरकञ्ज कृताखिलार्थ ॥ ७॥

लक्ष्मीनिवास तनुकोमलमंजुमध्य
लक्ष्यत्रिवल्युदरनाभिसरस्सरोज ।
रत्नाग्र्यमेखल रणच्चरणाब्जभूष
भृत्यं विलोकय दयार्द्रदृशाऽन्वहं माम् ॥ ८॥

इत्यष्टकेन हयकन्धरमिन्दिरेशं
रक्तात्मपादतलरञ्जितदिक्प्रदेशम् ।
तत्पादपद्मकृतमानसवादिराज-
प्रोक्तेन योऽर्चयति तस्य भवेत्प्रियोऽसौ ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

हयवदनाष्टकं समाप्तम्

हयास्यदशकम्

त्रियुगेऽष्टयुगेषु स्यान्मा कलौ जन्म भूद्धरे ।
मा पापी स्यां क्रियाहीनो मा मूढो मा च नारकी ॥ १॥

यथाऽसह्यं स्वस्य दुःखं तथाऽन्यस्यापि तत्समम् ।
इति प्रायेण भूतेषु को न जानात्यथापि हि ॥ २॥

मदान्धाः केऽपि पापान्धाः स्वभावान्धाश्च केचन ।
न पश्यन्ति परक्लेशं परत्र क्लेशमात्मनाम् ॥ ३॥

हा कष्टं देव लक्ष्मीश लोकाः पापानि कुर्वते ।
पर्वतेऽपि वसन्नाथ कुर्वेऽर्चां तव केवलम् ॥ ४॥

आसहस्राब्दमाकल्पमाकोट्यब्दमथापि वा ।
नरकघ्न कथं नाथ नरकाग्नौ पथेमहि ॥ ५॥

अनन्तजन्मपापानि मनोऽन्तस्थस्त्वमच्युत ।
जानासि नाथ तत्कष्टं ज्ञानासिस्ते छिनत्तु मे ॥ ६॥

रत्या रज्वा मनश्चोरं बध्नीहि चरणे तव ।
मरणेऽपि भवत्पादशरणः स्यामहं प्रभो ॥ ७॥

भवत्प्रसादसामर्थ्यादहमेतादृशोऽच्युत ।
हयग्रीव दयासिन्धो ज्ञानरूप हिरण्मय ॥ ८॥

त्वामेवेक्षे परोक्षे त्वां सेवे ध्यायामि कीर्तये ।
त्वामर्चये त्वां नमस्ये त्वां याचेऽन्ते परां गतिम् ॥ ९॥

सहस्रनामन्नामैकं प्रयच्छानन्तरूप ते ।
स्मरणायैकरूपं मे त्रिधामन्नेकधाम ते ॥ १०॥

स्मरता वादिराजेन स्मरतातमियं कृता ।
दशश्लोकीं पठन्नेतामनन्तश्लोक्यहो भवेत् ॥ ११॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

हयास्यदशकम् सम्पूर्णम्

हरिभक्ताष्टकम्

श्रीमध्वशुद्धराद्धान्तभूमयो धृतनेमयः ।
महान्तो हरिसन्तोषकराः क्लेशहरा मम ॥ १॥

रूक्षाघक्षालने दक्षा मोक्षदाधोक्षजेक्षणाः ।
रक्ष्येलक्ष्याविपक्षाक्षहर्यक्षाः परपक्षकाः ॥ २॥

सुदयानिधयो मोक्षावधयो विजिताऽऽधयः ।
हरिसन्निधयो ज्ञानेषुधयोऽम्बुधयो गुणैः ॥ ३॥

प्रभञ्जनाप्तचित्पुञ्जाक्ष्यञ्जना जनरञ्जनाः ।
निरञ्जनाः कञ्जनाभव्यञ्जना भवभञ्जनाः ॥ ४॥

नृत्यन्तः स्वान्तवृत्यन्तस्सन्तो हन्तोज्झिता हरिम् ।
भजन्तोऽन्यत्यजन्तस्ते यतयो गतयो मम ॥ ५॥

सदा शास्त्रविचारस्थान् सदाऽशास्त्रजये पटून् ।
सदा शास्त्रविचारस्थान् सदा शास्त्रपयोत्स्यतः ॥ ६॥

अलं पटादिविषयैरित्यलम्पटमानसान् ।
अनलंकुर्वतः स्वाङ्गमनलं कुर्वतो द्विषाम् ॥ ७॥

भ्रमतो भ्रमतो देशं नमतो नमतोदयम् ।
गुरून्विद्यागुरून्सर्वान् स्मरध्वं स्मरतो हरिम् ॥ ८॥

हरिभक्ताष्टकं दृष्टादृष्टसर्वेष्टपुष्टिदम् ।
यतिना वादिराजेन रचितं सर्वदा पठेत् ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

हरिभक्ताष्टकं सम्पूर्णम्

हर्यष्टकम्

स्वमुद्धर्तुं हरे वेत्ति किं कूपे पतितः पशुः ।
क्षिपन्नङ्घ्रिं मुहुः क्रन्दन् कृपां जनयति प्रभो ॥ १॥

अनिच्छतोऽपि तस्याज्ञस्याङ्गं कुक्षिं च दामभिः ।
शनैर्निबद्ध्य स्वजनैर्हरे स परमुद्धरेत् ॥ २॥

स हरे लालयेत् पङ्कं क्षालयेत् पालयेत् तृणैः ।
शमयेदौषधैर्मन्त्रैः स्वगोष्ठस्थस्य वेदनाम् ॥ ३॥

तथा नरपशोरीश भवकूपेऽर्दितस्य मे ।
हरे परिहराशेषक्लेशं केशिघ्न केशव ॥ ४॥

मां हि जीवन्मृतं कर्तुं यतन्ते परितः खलाः ।
तान्निहत्य हरे शीघ्रं सेवायां ते नियुङ्क्ष्व माम् ॥ ५॥

कामाद्यान्तरशत्रुभ्यो बाह्यशत्रुभ्य एव च ।
भीतं हरेऽसुराङ्गित प्रह्लादाह्लाद पाहि माम् ॥ ६॥

आधीन्वाधीन्नरीन्नाज्ञो द्रोहिणोऽन्यांश्च दुर्जनान् ।
क्षिप्रं नाशय सर्वज्ञ सर्वशक्ते हरे मम ॥ ७॥

कलिं खण्डय तद्भृत्यां दण्डयाशु हरे मम ।
मनश्शोधय सत्तत्त्वं बोधयेष्टं प्रसादय ॥ ८॥

वादिराजयतिप्रोक्तमेवं हर्यष्टकं नवम् ।
पठन्नृसिंहकृपया रिपून् संहरति क्षणात् ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

हर्यष्टकं सम्पूर्णम्

हितोपदेशः

स्मर कृष्णं भज हरिं नम विष्णुं श्रयाच्युतम् ।
त्यज कामं जहि क्रोधं जहि मोहं भवालयम् ॥ १॥

शृणु शौरिकथाः पुण्याः पश्य श्रीपतिविग्रहम् ।
जिघ्र श्रीपादतुळसीं स्पृश वैकुण्ठवल्लभम् ॥ २॥

भुङ्क्ष्व केशवनैवेद्यं तिष्ठ माधवमन्दिरे ।
जपन्नारायणमनुं पठ तन्नाममङ्गलम् ॥ ३॥

पाहि प्रपन्नजनतां ब्रूहि तथ्यं हितं नृणाम् ।
देहि काङ्क्षितं अर्थिभ्योः याहि सज्जनसङ्गतिम् ॥ ४॥

कुरु भूतदयां नित्यं चर धर्ममहर्निशम् ।
जानीहि नित्यमात्मानं अवेह्यन्यद्धि नश्वरम् ॥ ५॥

पञ्चश्लोकीमिमां शश्वत् पठ धारय चिन्तय ।
एतावान् सर्ववेदार्थः समासेन निरूपितः ॥ ६॥

"नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम्" ॥ (महा. §)

इति श्रीमद्वादिराजपूज्यचरणविरचितः

हितोपदेशः सम्पूर्णः

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु